PK 3794
.J3 G5

1808

FT MEADE
ASIAN

THE LIBRARY OF CONGRESS

THE LIBRARY OF CONGRESS

Herrn Prof. A. Weber zur freundl. Erinnerung

von seinem ergebenen Schüler

S. Goldschmidt.

Berlin 11.3.69.

voila

61600

'00

WEBER COLLECTION.

90-984094

PK 3794 .J3 G5 1808 Orien Sans

॥ ॐ॥ श्रीगणेशायनमः॥ मेघैर्मेदुरमम्बरम्वनभुवःश्यामास्तमालद्रुमैर्नक्तम्भीरुरय
न्त्वमेवतदिमंराधेगृहम्प्रापय। इत्थंनन्दनिदेशतश्चलितयोःप्रत्यध्वकुञ्जद्रुमंराधामाधव
योर्जयन्तियमुनाकूलेरहःकेलयः॥१॥ वाग्देवताचरितचित्रितचित्तसद्मापद्मावती
चरणचारणचक्रवर्त्ती।श्रीवासुदेवरतिकेलिकथासमेतमेतङ्करोतिजयदेवकविःप्रब
न्धम्॥२॥ यदिहरिस्मरणेसरसम्मनोयदिविलासकलासुकुतूहलम्। मधुरको
॥१॥ मलकान्तपदावलींशृणुतदाजयदेवसरस्वतीम्॥३॥ वाचःपल्लवयत्युमापतिधरस्सन्दर्भ
शुद्धिङ्गिराञ्जानीतेजयदेवएवशरणःश्लाघ्योदुरूहद्रुतेः।शृङ्गारोत्तरसत्प्रमेयरचनैराचा

र्य्यंगोवर्द्धनस्पर्द्धीकोपिनविश्रुतःश्रुतिधरोधोयीकविक्ष्मापतिः ॥ ४ ॥ ❁ ॥ मालवगौडा
रागेणरूपकतालेनगीयते । प्रलयपयोधिजलेधृतवानसिवेदम् विहितवहित्रचरित्र
मखेदम् । केशवधृतमीनशरीर जयजगदीशहरे ॥ १ ॥ ध्रुवम् ॥ क्षितिरतिविपुल
तरेतवतिष्ठतिपृष्ठे धरणिधरणकिणचक्रगरिष्ठे । केशवधृतकच्छपरूप जयजगदी
शहरे ॥ २ ॥ वसतिदशनशिखरेधरणीतवलग्ना शशिनिकलङ्ककलेवनिमग्ना । केशव
धृतशूकररूप जयजगदीशहरे ॥ ३ ॥ तवकरकमलवरेनखमद्भुतशृङ्गं दलितहि
रण्यकशिपुतनुभृङ्गम् । केशवधृतनरहरिरूप जयजगदीशहरे ॥ ४ ॥ छलयसि

विक्रमणेबलिमद्भुतवामन पदनखनीरजनितजनपावन । केशवधृतवामनरूपजयज
गदीशहरे ॥ ५ ॥ क्षत्रियरुधिरमयेजगदपगतपापं स्नपयसिपयसिशमितभवता
पम् । केशवधृतभृगुपतिरूपजयजगदीशहरे ॥ ६ ॥ वितरसिदिक्षुरणेदिक्पति
कमनीयं दशमुखमौलिबलिंरमणीयम् । केशवधृतरामशरीरजयजगदीशहरे
॥ ७ ॥ वहसिवपुषिविशदेवसनञ्जलदाभं हलहतिभीतिमिलितयमुनाभम् । केशव
धृतहलधररूपजयजगदीशहरे ॥ ८ ॥ निन्दसियज्ञविधेरहहश्रुतिजातं सदयहृ
दयदर्शितपशुघातम् । केशवधृतबुद्धशरीरजयजगदीशहरे ॥ ९ ॥ म्लेच्छनि

वह्निधनेकलयसिकरवालं धूमकेतुमिवकिमपिकरालम् । केशवधृतकल्किशरीरज
यजगदीशहरे ॥ १० ॥ श्रीजयदेवकवेरिदमुदितमुदारं शृणुसुखदंशुभदम्भव
सारम् । केशवधृतदशविधरूपजयजगदीशहरे ॥ ११ ॥ वेदानुद्धरतेजगन्नि
वहतेभूगोलमुद्बिभ्रतेदैत्यन्दारयतेबलिंछलयतेक्षत्रक्षयंकुर्वते । पौलस्त्यञ्जयतेहलङ्क
लयतेकारुण्यमातन्वतेम्लेच्छान्मूर्च्छयतेदशाकृतिकृतेकृष्णायतुभ्यन्नमः ॥ १ ॥ ❁ ॥गुञ्जरी
रागनिस्सारतालाभ्याम् । श्रितकमलाकुचमण्डलधृतकुण्डलए कलितललितवनमाल
जयजयदेवहरे ॥ २ ॥ ध्रुवम् ॥ दिनमणिमण्डलमण्डनभवखण्डनए । मुनिजनमान

सहंस जयजय० ॥ २ ॥ कालियविषधरगञ्जनजनरञ्जनए । यदुकुलनलिनदिने
श जयजय० ॥ ३ ॥ मधुमुरनरकविनाशनगरुडासनए । सुरकुलकेलिनिदान जय
जय० ॥ ४ ॥ अमलकमलदललोचनभवमोचनए । त्रिभुवनभवननिधान जयजय०
॥ ५ ॥ जनकसुताकृतभूषणजितदूषणए । समरशमितदशकण्ठ जयजय० ॥ ६ ॥
अभिनवजलधरसुन्दरधृतमन्दरए । श्रीमुखचन्द्रचकोर जयजय० ॥ ७ ॥ तवचर
णेप्रणतावयमितिभावयए । कुरुकुशलम्प्रणतेषु जयजय० ॥ ८ ॥ श्रीजयदेवकवेरि
दंकुरुतेमुदम् । मङ्गलमुज्ज्वलगीति जयजय० ॥ ९ ॥ पद्मापयोधरतटीपरिरम्भलग्नका

श्मीरमुद्रितमुरो मधुसूदनस्य । व्यक्तानुरागमिवखेलदनङ्गखेदस्वेदाम्बुपूरमनुपूरयतु प्रि
यम्वः ॥ १॥ वसन्तेवासन्तीकुसुमसुकुमारैरवयवैर्भ्रमन्तीं कान्तारे बहुविहितकृष्णानु
सरणाम् । अमन्दङ्कन्दर्पज्वरजनितचिन्ताकुलतयाबलद्बाधांराधांसरसमिदमूचे स
हचरी ॥ २ ॥ ❁ ॥ वसन्तरागयतितालाभ्याम् । ललितलवङ्गलतापरिशीलनको
मलमलयसमीरे मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे । विहरतिहरिरिह
सरसवसन्तेनृत्यतियुवतिजनेनसमंसखिविरहिजनस्यदुरन्ते ॥ १ ॥ ध्रुवम् ॥ उन्म
दमदनमनोरथपथिकवधूजनजनितविलापे अलिकुलसंकुलकुसुमसमूहनिराकु

लवकुलकलापे। विहरति० ॥ २॥ मृगमदसौरभरभसवशम्वदनवदलमालतमाले यु
वजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले। विहरति० ॥ ३ ॥ मदनमहीप
तिकनकदण्डरुचिकेशरकुसुमविकासे मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविला
से। विहरति० ॥ ४ ॥ विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे विरहि
निकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे। विहरति० ॥ ५ ॥ माधविकापरिमलललि
तेनवमालिकयातिसुगन्धौ मुनिमनसामपिमोहनकारिणितरुणाकारणबन्धौ। विहर
ति० ॥ ६ ॥ स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते बृन्दावनविपिनेपरिस

 रपरिगतयमुनाजलपूते । विहरति० ॥ ७ ॥ श्रीजयदेवभणितमिदमुदयति हरिच
 रणस्मृतिसारम् सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् । विहरति० ॥ ८ ॥
दरविदलितमल्लीवल्लिचञ्चत्परागप्रकटितपटवासैर्वासयन्काननानि । इह हि दहति चेतः
केतकीगन्धबन्धुः प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ १ ॥ उन्मीलन्मधुगन्धलुब्धमधुपव्या
धूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः । नीयन्ते पथिकैः कथङ्कथम
पिध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ २ ॥ अनेकनारीपरि
रम्भसम्भ्रमस्फुरन्मनोहारिविलासलालसम् । मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुन

राहराधिकाम् ॥ ३ ॥ ❁ ॥ रामकिरीरागयतितालाभ्याम् । चन्दनचर्च्चितनीलकलेवरपीतव
सनवनमाली केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली । हरिरिहमुग्धवधूनिक
रे विलासिनिविलसतिकेलिपरे ॥ १ ॥ ध्रुवम् ॥ पीनपयोधरभारभरेणहरिंपरिरभ्यस
रागं गोपवधूरनुगायतिकाचिदुदञ्चितपञ्चमरागम् । हरिरिह० ॥ २ ॥ कापिविलास
विलोलविलोचनखेलनजनितमनोजं ध्यायतिमुग्धवधूरधिकंमधुसूदनवदनसरो
॥ गी ॥ जम् । हरिरिह० ॥ ३ ॥ कापिकपोलतलेमिलितालपितुङ्किमपिश्रुतिमूले चारुचचुम्बनि
तम्बवतीदयितंपुलकैरनुकूले । हरिरिह० ॥ ४ ॥ केलिकलाकुतुकेनचकाचिदमुंयमुना

जलकूले मञ्जुलवञ्जुलकुञ्जगतंविचकर्षकरेणदुकूले । हरिरिह० ॥ ५ ॥ करतलता
लतरलवलयावलिकलितकलस्वनवंशे रासरसेसहनृत्यपराहरिणायुवतिःप्रशशंसे । ह
रिरिह० ॥ ६ ॥ श्लिष्यतिकामपिचुम्बतिकामपिकामपिरमयतिरामां पश्यतिसस्मितचा
रुपरामपरामनुगच्छतिवामाम् । हरिरिह० ॥ ७ ॥ श्रीजयदेवभणितमिदमद्भुतकेशव
केलिरहस्यं वृन्दावनविपिनेललितंवितनोतुशुभानियशस्यम् । हरिरिह० ॥ ८ ॥
विश्वेषामनुरञ्जनेनजनयन्नानन्दमिन्दीवरश्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्
। स्वच्छन्दंव्रजसुन्दरीभिरभितःप्रत्यङ्गमालिङ्गितःशृङ्गारःसखिमूर्त्तिमानिवमधौमुग्धोह

रिःक्रीडति ॥ १ ॥ अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलम्प्रालेयप्लवनेच्छयानुस
रतिश्रीखण्डशैलानिलः। किञ्चस्निग्धरसालमौलिमुकुलान्यालोक्यहर्षोदयादुन्मीलन्तिकु
हूःकुहूरितिकलोत्तालाःपिकानाङ्गिरः ॥ २ ॥ रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवा
मभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमान्धयाराधया। साधुत्वद्वदनंसुधामयमितिव्याहृत्यगीतस्तुति
व्याजादुद्भटचुम्बितःस्मितमनोहारीहरिःपातुवः ॥ ३ ॥ ❁ ॥ इतिश्रीगीतगोविन्देसामो
ददामोदरोनामप्रथमःसर्गः ॥ १ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ विहरतिवनेराधासाधारणप्रणये
हरौविगलितनिजोत्कर्षादीर्ष्यावशेनगतान्यतः। क्वचिदपिलताकुञ्जेगुञ्जन्मधुव्रतमण्डली

गी॰गो॰ मुखरशिखरे लीनादीनाप्युवाच रहः सखीम् ॥ १ ॥ गुज्जरीरागेण यतितालेन गीयते । स
॥ ६ ॥ ञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशं चलितदृगञ्चलचञ्चलमौलिकपोलविलोल
वतंसम् । रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासम् ॥ १ ॥ ध्रुवम् ॥ च
न्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशं प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदि
रसुवेशम् । रासे॰ ॥ २ ॥ गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभं बन्धुजीवमधु
राधरपल्लवमुल्लसितस्मितशोभम् । रासे॰ ॥ ३ ॥ विपुलपुलकभुजपल्लववलयितवल्लव
युवतिसहस्रं करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रम् । रासे॰ ॥ ४ ॥ जलद

पटलवलदिन्दुविनिन्दकचन्दनतिलकललाटं पीनपयोधरपरिसरमर्द्दननिर्द्दयहृदयक
पाटम् । रासे० ॥ ५ ॥ मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारं पीतवसनमनु
गतमुनिमनुजसुरासुरवरपरिवारम् । रासे० ॥ ६ ॥ विशदकदम्बतले मिलितं कलिकलु
षभयं शमयन्तं मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम् । रासे० ॥ ७ ॥ श्री
जयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपं हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनु
रूपम् । रासे० ॥ ८ ॥ गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च परितोषं दोषं विमु
ञ्चति दूरतः । युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना पुनरपि मनो वामं कामं करोति च क

रोमिकिम् ॥ १ ॥ ॥ मालवगौडारागेणएकतालीतालेनगीयते । निभृतनिकुञ्जगृहं
गतयानिशिरहसिनिलीयवसन्तं चकितविलोकितसकलदृशारतिरभसभरेणहसन्तम्
। सखिहेकेशिमथनमुदारं रमयमयासहमदनमनोरथभावितयासविकारम्
॥ १ ॥ ध्रुवम् ॥ प्रथमसमागमलज्जितयापटुचाटुशतैरनुकूलं मृदुमधुरस्मितभाषित
याशिथिलीकृतजघनदुकूलम् । सखिहे० ॥ २ ॥ किशलयशयननिवेशितयाचिरमु
रसिममैवशयानं कृतपरिरम्भणचुम्बनयापरिरभ्यकृताधरपानम् । सखिहे० ॥ ३ ॥
अलसनिमीलितलोचनयापुलकावलिललितकपोलं श्रमजलसिक्तकलेवरयावरमदनम

द्दार्दनिलोलम् । सखिहे० ॥ ४ ॥ कोकिलकलरवकूजितयाजितमनसिजतन्त्रविचारं श्लथकुसुमाकुलकुन्तलयानखलिखितघनस्तनभारम् । सखिहे० ॥ ५ ॥ चरणरणितमणिनूपुरयापरिपूरितसुरतवितानं मुखरविशृङ्खलमेखलयासकचग्रहचुम्बनदानम् । सखिहे० ॥ ६ ॥ रतिसुखसमयरसालसयादरमुकुलितनयनसरोजं निस्सहनिपतिततनुलतयामधुसूदनमुदितमनोजम् । सखिहे० ॥ ७ ॥ श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम् । सखिहे० ॥

॥ ८ ॥ हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृन्दोत्सारिदृगन्तवीक्षितमतिस्वे

 दार्द्रगण्डस्थलम् । मामुद्वीक्ष्यविलक्षितस्मितसुधामुग्धाननंकाननेगोविन्दंव्रजसुन्दरी
 गणावृतंपश्यामिहृष्यामिच ॥ १ ॥ दुरालोकस्तोकस्तवकनवकाशोकलतिकाविकासः
कासारोपवनपवनोपिव्यथयति । अपिभ्राम्यद्भृङ्गीरणितरमणीयानमुकुलप्रसूतिश्चूता
नांसखिशिखरिणीयंसुखयति ॥ २ ॥ साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित
भ्रूवल्लीकमलीकदर्शितभुजाबालार्द्धदृष्टस्तनम् । गोपीनांनिभृतंनिरीक्ष्यदयिताकांक्ष
श्चिरंचिन्तयन्नन्तर्मुग्धमनोहरोहरतुवःक्लेशंनवःकेशवः ॥ ३ ॥ ❁ ॥ इतिश्रीगीतगो
विन्देअक्लेशकेशवोनामद्वितीयस्सर्गः ॥ २ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ कंसारिरपिसंसा

रवासनाबन्धशृङ्खलाम्। राधामाधयहृदयेतत्याजव्रजसुन्दरीः॥१॥ इतस्ततस्ताम
नुसृत्यराधिकामनङ्गबाणव्रणखिन्नमानसः। कृतानुतापःसकलिन्दनन्दिनीतटान्तकुञ्जे
निषसादमाधवः॥२॥ गुज्जरीरागेणयतितालेनच। मामियंचलिताविलोक्यवृतंबधूनिच
येन सापराधतयामयापिनवारितातिभयेन। हरिहरिहतादरतयागतासाकुपितेव॥१॥
ध्रुवम्॥ किंकरिष्यतिकिंवदिष्यतिसाचिरंविरहेण किंधनेनजनेनकिंममजीवितेनगृ
हेण। हरिहरि०॥२॥ चिन्तयामितदाननंकुटिलभ्रुकोपभरेण शोणपद्ममिवो
परिभ्रमताकुलंभ्रमरेण। हरिहरि०॥३॥ तामहंहृदिसङ्गतामनिशंभृशंरमया

गी०गो० मि किंवनेऽनुसरामितामिह किंवृथाविलयामि। हरिहरि०॥ ४॥ तन्विखिन्नमसूययाहृ
॥ ९ ॥ दयन्तवाकलयामि तन्नवेद्मिकुतोगतासिनतेनतेऽनुनयामि। हरिहरि०॥ ५॥ दृश्यसेपु
रतोगतागतमेवमेविदधासि किंपुरेवससंभ्रमम्परिरम्भणंनददासि। हरिहरि०॥ ६॥
क्षम्यतामपरङ्कदापितवेदृशन्नकरोमि देहिसुन्दरिदर्शनम्ममन्मथेनदुनोमि। हरि
हरि०॥ ७॥ वर्णितञ्जयदेवकेनहरेरिदम्प्रवणेन किन्दुबिल्वसमुद्रसम्भवरोहिणीरम
णेन। हरिहरि०॥ ८॥ हृदिविसलताहारोनायंभुजङ्गमनायकःकुवलयदलश्रेणीकण्ठे
नसागरलद्युतिः। मलयजरजोनेदम्भस्मप्रियारहितेमयिप्रहरनहरभ्रान्त्यानङ्गक्रु

धाकिमुधावसि ॥ १ ॥ पाणौमाकुरु चूतसायकममुम्माचापमारोपयक्रीडानिर्जितविश्वमू
र्च्छितजनाघातेनकिंपौरुषम् । तस्यास्तवमृगीदृशोमनसिजप्रेङ्खत्कटाक्षाशुगश्रेणीज
र्ज्जरितंमनागपिमनोनाद्यापिसन्धुक्षते ॥ २ ॥ भ्रूपल्लवंधनुरपाङ्गतरङ्गितानिबाणागु
णाःश्रवणपालिरितिस्मरेण । तस्यामनङ्गजयजङ्गमदेवतायामस्त्राणिनिर्ज्जितजगन्ति
किमर्प्पितानि ॥ ३ ॥ भ्रूचापेनिहितःकटाक्षविशिखोनिर्म्मातुमर्म्मव्यथांश्यामात्माकुटिलः
करोतुकवरीभारोपिमारोद्यमम् । मोहन्तावदयञ्चतन्वितनुतांविम्बाधरोरागवान्सद्वृत्तस्त
नमण्डलस्तवकथंप्राणैर्ममक्रीडति ॥ ४ ॥ तानिस्पर्शसुखानितेचतरलाःस्निग्धादृशोर्विभ्र

मासद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा । सा बिम्बाधरमाधुरीति विषयासङ्गे
पि चेन्मानसं तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्द्धते ॥ ५ ॥ तिर्य्यक्कराठविलोलमौ
लितरलोत्तंसस्य वंशोच्चरद्गीतस्थानकृतावधानललनालक्षैर्न संलक्षिताः । संमुग्धं मधुसूद
नस्य मधुरे राधामुखेन्दौ मृदुस्पन्दं कन्दलिताश्चिरं दधतु वः क्षेमं कटाक्षोर्म्मयः ॥ ६ ॥ ❁ ॥
इति श्रीगीतगोविन्दे मुग्धमधुसूदनो नाम तृतीयः सर्गः ॥ ३ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥
यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम् । प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी ॥ १॥
कर्णाटरागैकतालीतालाभ्याम् । निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरं व्या

लनिलयमिलनेनगरलमिवकलयतिमलयसमीरम् । साविरहेतवदीना माधवमनसि
जविशिखभयादिवभावनयात्वयिलीना ॥ १ ॥ ध्रुवम् ॥ अविरलनिपतितमदनशरादि
वभवदवनायविशालं स्वहृदयमर्म्मणिवर्म्मकरोतिसजलनलिनीदलजालम् । साविरहे०
॥ २ ॥ कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं व्रतमिवतवपरिरम्भसुखाय
करोतिकुसुमशयनीयम् । साविरहे० ॥ ३ ॥ वहतिचवलितविलोचनजलधरमाननकम
लमुदारं विधुमिवविकटविधुन्तुददन्तदलनगलितामृतधारम् । साविरहे० ॥ ४ ॥ विलि
खतिरहसिकुरङ्गमदेनभवन्तमसमशरभूतं प्रणमतिमकरमधोविनिधायकरेचशरंनव

चूतम्। साविरहे० ॥ ५ ॥ प्रतिपदमिदमपिनिगदतिमाधवतवचरणेपतिताहं त्वयिवि
मुखेमयिसपदिसुधानिधिरपितनुतेतनुदाहम्। साविरहे० ॥ ६ ॥ ध्यानलयेनपुरःपरि
कल्प्यभवन्तमतीवदुरापं विलपतिहसतिविषीदतिरोदितिचञ्चतिमुञ्चतितापम्। साविर
हे० ॥ ७ ॥ श्रीजयदेवभणितमिदमधिकंयदिमनसानटनीयं हरिविरहाकुलवल्लवयु
वतिसखीवचनंपठनीयम्। साविरहे० ॥ ८ ॥ आवासोविपिनायतेप्रियसखीमालापिजाला
यतेतापोपिश्वसितेनदावदहनज्वालाकलापायते। सापित्वद्विरहेणहन्तहरिणीरूपाय
तेहाकथंकन्दर्पोऽपियमायतेविरचयन्शार्दूलविक्रीडितम् ॥ ९ ॥ ॥ देशागरागेकता

सीनालाभ्याम् । स्तनविनिहितमपिहारमुदारं सामनुते कृशतनुरिवभारम् । राधिका विरहेतवकेशव ॥ १॥ ध्रुवम् ॥ सरसमसृणमपिमलयजपङ्कं पश्यतिविषमिववपुषिसशङ्कम् । राधिका० ॥ २ ॥ श्वसितपवनमनुपमपरिणाहं मदनदहनमिववहति सदाहम् । राधिका० ॥ ३ ॥ दिशिदिशिकिरतिसजलकणजालं नयननलिनमिवविगलितनालम् । राधिका० ॥ ४ ॥ नयनविषयमपिकिशलयतल्पं गणयतिविहितहुताशविकल्पम् । राधिका० ॥ ५ ॥ त्यजतिनपाणितलेनकपोलं बालशशिनमिवसायमलोलम् । राधिका० ॥ ६ ॥ हरिरितिहरिरितिजपतिसकामं विरहविहितमरणे

वनिकामम् । राधिका० ॥ ७ ॥ श्रीजयदेवभणितमितिगीतं सुखयतुकेशवपदमुप
नीतम् । राधिका० ॥ ८ ॥ सारोमाञ्चतिसीत्करोतिविलपत्युत्कम्पतेताम्यतिध्यायत्युद्भ्रम
तिप्रमीलतिपतत्युद्यातिमूर्च्छत्यपि । एतावत्यतनुज्वरेवरतनुर्जीवेन्नकिंतेरसात्स्वर्वैद्य
प्रतिमप्रसीदसियदित्यक्तोऽन्यथाहस्तकः ॥ १ ॥ स्मरातुरांदैवतवैद्यहृद्यत्वदङ्गसङ्गा
मृतमात्रसाध्याम् । विमुक्तबाधांकुरुषेनराधामुपेन्द्रवज्रादपिदारुणोऽसि ॥ २ ॥ कन्दर्प
ज्वरसंज्वरातुरतनोराश्चर्य्यमस्याश्चिरंचेतश्चन्दनचन्द्रमःकमलिनीचिन्तासुसंताम्यति ॥
किन्तुक्षान्तिवशेनशीतलतनुंत्वामेकमेवप्रियंध्यायन्तीरहसिस्थिताकथमपिक्षीणाक्षणंप्रा

णिनि ॥ ३ ॥ क्षणमपिविरहः पुरानसेहेनयननिमीलनखिन्नयाययाते । श्वसितिकथमसौरसालशाखांचिरविरहेणविलोक्यपुष्पिताग्राम् ॥ ४ ॥ वृष्टिव्याकुलगोकुलावनवशादुद्धृत्यगोवर्द्धनंविभ्रद्वल्लवबल्लभाभिरधिकानन्दाच्चिरंचुम्बितः । दर्प्पेणैवतदर्पिताधरतटीसिन्दूरमुद्राङ्कितोबाहुर्गोपतनोस्तनोतुभवतांश्रेयांसिकंसद्विषः ॥ ५ ॥ ❁ ॥ इतिश्रीगीतगोविन्देस्निग्धमधुसूदनोनामचतुर्थस्सर्गः ॥ ४ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अहमिहनिवसामियाहिराधामनुनयमद्वचनेनचानयेथाः । इतिमधुरिपुणासखीनियुक्तास्वयमिदमेत्यपुनर्जगादराधाम् ॥ १ ॥ वराडीरागेणरूपकतालेन । वहतिमलयसमीरेमदन

 मुपनिधाय स्फुटति कुसुमनिकरे विरहिहृदयदलनाय । तवविरहे वनमाली सखि सी
 दति ॥ १ ॥ ध्रुवम् ॥ दहति शिशिरमयूखे मरणमनुकरोति पतति मदनविशिखे विल
पति विकलतरोऽति । तवविरहे० ॥ २ ॥ ध्वनति मधुपसमूहे श्रवणमपिदधाति मनसि व
लितविरहे निशि निशि रुजमुपयाति । तवविरहे० ॥ ३ ॥ वसति विपिनविताने त्यजति ल
लितनिजधाम लुठति धरणिशयने बहु विलपति तव नाम । तवविरहे० ॥ ४ ॥ भणति
कविजयदेवे विरहिविलसितेन मनसि रभसविभवे हरिरुदयतु सुकृतेन । तवविरहे०
॥ ५ ॥ पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुन

र्म्माधवः। ध्यायंस्त्वामनिशंजपन्नपितवैवालापमन्त्रावलींभूयस्त्वत्कुचकुम्भनिर्भरपरीर म्भामृतंवाञ्छति॥ १॥ ❁ ॥ रतिसुखसारेगतमभिसारेमदनमनोहरवेषं नकुरुनितम्बि निगमनविलम्बनमनुसरतंहृदयेशम्। धीरसमीरेयमुनातीरेवसतिवनेवनमाली गोपी पीनपयोधरमर्द्दनचञ्चलकरयुगशाली ॥ १॥ ध्रुवम्॥ नामसमेतंकृतसङ्केतंवादयतेमृ दुवेणुं बहुमनुनेतनुतेतनुसङ्गतपवनचलितमपिरेणुम्। धीरसमीरे०॥ २॥ पतति पतत्रेविचलतिपत्रेशङ्कितभवदुपयानं रचयतिशयनंसचकितनयनंपश्यतितवपन्था नम्। धीरसमीरे० ॥ ३॥ मुखरमधीरंत्यजमञ्जीरंरिपुमिवकेलिसुलोलं चलसखिकुञ्जं

सतिमिरपुञ्जंशीलयनीलनिचोलम् । धीरसमीरे० ॥ ४ ॥ उरसिमुरारेरुपहितहारे
घनइवतरलबलाके तडिदिवपीतेरतिविपरीतेराजसिसुकृतविपाके । धीरसमीरे०
॥ ५ ॥ विगलितवसनंपरिहृतरसनंघटयजघनमपिधानं किशलयशयनेपङ्कजनयने
निधिमिवहर्षनिधानम् । धीरसमीरे० ॥ ६ ॥ हरिरभिमानीरजनिरिदानीमियमपिया
तिविरामं कुरुममवचनंसत्वररचनंपूरयमधुरिपुकामम् । धीरसमीरे० ॥ ७ ॥ श्रीजयदे
वेकृतहरिसेवेभणतिपरमरमणीयं प्रमुदितहृदयंहरिमतिसदयंनमतसुकृतकमनी
यम् । धीरसमीरे० ॥ ८ ॥ विकिरतिमुहुःश्वासानाशाःपुरोमुहुरीक्षतेप्रविशतिमुहुःकुञ्जं

गुञ्जन्मुहुर्बहुताम्यति । रचयतिमुहुःशय्यांपर्य्याकुलंमुहुरीक्षतेमदनकदनक्लान्तः
कान्तेप्रियस्तववर्त्तते ॥ १॥ त्वद्वाम्येनसमंसमग्रमधुनातिग्मांशुरस्तंगतोगोविन्दस्यमनो
रथेनचसमंप्राप्तंतमःसान्द्रताम् । कोकानांकरुणास्वनेनसदृशीदीर्घामदभ्यर्थनातन्मुग्धे
विफलंविलम्बनमसौरम्योऽभिसारक्षणः ॥ २॥ आश्लेषादनुचुम्बनादनुनखोल्लेखादनुस्वा
न्तजप्रोद्बोधादनुसम्भ्रमादनुरतारम्भादनुप्रीतयोः । अन्यार्थंगतयोर्भ्रमान्मिलितयोः
सम्भाषणैर्जानतोर्दम्पत्योर्न्निशिकोनकोनतमसिव्रीडाविमिश्रोरसः ॥ ३॥ सभयचकितंवि
न्यस्यन्तींदृशौतिमिरेपथिप्रतितरुमुहुःस्थित्वामन्दंपदानिवितन्वतीम् । कथमपिरहः

प्राप्तामङ्गैरनङ्गतरङ्गिभिःसुमुखिसुभगःसत्वांपश्यन्नुपैतुक्तनार्थताम् ॥ ४ ॥ राधामुग्धमु
खारविन्दमधुपस्त्रैलोक्यमौलिस्थलीनेपथ्योचितनीलरत्नमवनीभारावतारान्तकः । स्वच्छन्दं
व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरंकंसध्वंसनधूमकेतुरवतुत्वांदेवकीनन्दनः ॥ ५ ॥ ❁ ॥
इतिश्रीगीतगोविन्देअभिसारिकावर्णनेसाकाङ्क्षपुण्डरीकाक्षोनामपञ्चमस्सर्गः ॥ ५ ॥
॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अथतांगन्तुमसक्तांचिरमनुरक्तांलतागृहेदृष्ट्वा । तच्चरितंगोविन्दे
मनसिजमन्देसखीप्राह ॥ १ ॥ गोण्डकिरीरागेणरूपकतालेनगीयते । पश्यतिदिशि
दिशिरहसिभवन्तं त्वदधरमधुरमधूनिपिबन्तम् । नाथहरेसीदतिराधावासगृहे ॥ १ ॥

ध्रुवम्॥ त्वदभिसरणरभसेन वलन्ती पततिपदानि कियन्तिचलन्ती। नाथहरे०॥ २॥
विहितविशदविसकिशलयवलया जीवतिपरमिहतवरतिकलया। नाथहरे० ॥ ३ ॥
मुहुरवलोकितमण्डललीला मधुरिपुरहमितिभावनशीला। नाथहरे० ॥ ४ ॥ त्वरि
तमुपैतिनकथमभिसारं हरिरितिवदतिसखीमनुवारम्। नाथहरे० ॥ ५ ॥ श्लिष्यति
चुम्बतिजलधरकल्पं हरिरुपगतइतितिमिरमनल्पम्। नाथहरे० ॥ ६ ॥ भवतिवि
लम्बिनिविगलितलज्जा विलपतिरोदितिवासकसज्जा। नाथहरे०॥ ७ ॥ श्रीजयदे
वकवेरिदमुदितं रसिकजनंतनुतामतिमुदितम्। नाथहरे० ॥ ८ ॥ विपुलपुलक

 पालिःस्फीतसीत्कारमन्तर्जनितजडिमकाकुव्याकुलंव्याहरन्ती । नवकितवविधायामन्द
 कन्दर्पचिन्तांरसजलधिनिमग्नाध्यानलग्नामृगाक्षी ॥ १ ॥ अङ्गेष्वाभरणंकरोतिबहुशः
पत्रेपिसञ्चारिणिप्राप्तंत्वांपरिशङ्कतेवितनुतेशय्यांचिरंध्यायति । इत्याकल्पविकल्पत
ल्परचनासङ्कल्पलीलाशतव्यासक्तापिविनात्वयावरतनुर्नैषानिशांनेष्यति ॥ २ ॥ किंविश्रा
म्यसिकृष्णभोगिभवनेभाण्डीरभूमीरुहिभ्रातर्यासिनदृष्टिगोचरमितःसानन्दनन्दास्पदम्
। राधायावचनंतदध्वगमुखान्नन्दान्तिकेगोपतोगोविन्दस्यजयन्तिसायमतिथेःसुस्निग्धग
र्भागिरः ॥ ३ ॥ ❁ ॥ इतिश्रीगीतगोविन्देवासकसज्जावर्णनेधृष्टवैकुण्ठोनामषष्ठस

र्गः ॥ ६ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अत्रान्तरेचकुलटाकुलवर्त्मपातसञ्जातपातकइ
वस्फुटलाञ्छनश्रीः। वृन्दावनान्तरमदीपयदंशुजालैर्दिक्सुन्दरीवदनचन्दनविन्दु
रिन्दुः ॥ १ ॥ प्रसरतिशशधरबिम्बेविहितविलम्बेचमाधवेविधुरा । विरचितविविधवि
लापंसापरितापंचकारोच्चैः ॥ २ ॥ मालवरागयतितालाभ्याम् । कथितसमयेपिहरिरह
हनययौवनं ममविफलमेतदनुरूपयौवनम् । यामिहेकमिहशरणंसखीजनव
चनवञ्चिता ॥ १ ॥ ध्रुवम् ॥ यदनुगमनायनिशिगहनमपिशीलितं तेनममहृदय
मिदमसमशरकीलितम् । यामिहे० ॥ २ ॥ ममरणमेववरमतिवितथकेतना किमि

गी०गो० ह्विषह्हामिविरहानलमचेतना। यामिहे० ॥ ३ ॥ मामहहविधुरयतिमधुरमधुया
॥१७॥ मिनी कापिहरिमनुभवतिकृतसुकृतकामिनी। यामिहे० ॥ ४ ॥ अहहकलयामिवल
यादिमणिभूषणं हरिविरहदहनवहनेनबहुदूषणम्। यामिहे० ॥ ५ ॥ कुसुमसु
कुमारतनमतनुशरलीलया स्रगपिहृदिहन्तिमामतिविषमशीलया। यामिहे० ॥ ६ ॥
अहमिहनिवसामिनगणितवनवेतसा स्मरतिमधुसूदनोमामपिनचेतसा। यामिहे०
॥ ७ ॥ हरिचरणशरणजयदेवकविभारती वसतिहृदियुवतिरिवकोमलकलावती।
यामिहे० ॥ ८ ॥ तत्किंकामपिकामिनीमभिसृतःकिम्वाकलाकेलिभिर्बद्धोबन्धुभिरन्धका

रिणिवनाभ्यर्णेकिमुद्भ्राम्यति । कान्तःक्लान्तमना मनागपिपथिप्रस्थातुमेवाक्षमःसङ्केतीकृत
मञ्जुवञ्जुललताकुञ्जेपियन्नागतः ॥ १ ॥ अथागतांमाधवमन्तरेणसखीमियंवीक्ष्यविषा
दमूकाम् । विशङ्कमानारमितंकयापिजनार्द्दनंदृष्टवदेतदाह ॥ २ ॥ ❁ ॥ वसन्त
रागयतितालाभ्याम् । स्मरसमरोचितविरचितवेषा गलितकुसुमदरविलुलितकेशा । का
पिमधुरिपुणा विलसतियुवतिरधिकगुणा ॥ १ ॥ ध्रुवम् ॥ हरिपरिरम्भणवलितवि
कारा कुचकलशोपरितरलितहारा । कापि० ॥ २ ॥ विचलदलकललिताननचन्द्रा त
दधरपानरभसकृततन्द्रा । कापि० ॥ ३ ॥ चञ्चलकुण्डलदलितकपोला मुखरितरस

नजघनगतिलोला । कापि० ॥ ४ ॥ दयितविलोकितलज्जितहसिता बहुविधकूजित
रतिरसरसिता । कापि० ॥ ५ ॥ विपुलपुलकपृथुवेपथुभङ्गा श्वसितनिमीलितविक
सदनङ्गा । ६ ॥ श्रमजलकणभरसुभगशरीरा परिपतितोरसि रतिरणधीरा । का
पि० ॥ ७ ॥ श्रीजयदेवभणितमतिललितं कलिकलुषंशमयतुहरिरमितम् । कापि०
॥ ८ ॥ विरहपाण्डुमुरारिमुखाम्बुजद्युतिरयंतिरयन्नपिवेदनाम् । विधुरतीवतनोतिम
नोभुवःसुहृदयेहृदयेमदनव्यथाम् ॥ १ ॥ ❁ ॥ गुञ्जरीरागैकतालीतालौ । समुदित
मदनेरमणीवदनेचुम्बनवलिताधरे मृगमदतिलकंलिखतिसपुलकंमृगमिवरजनीकरे

। रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥ १ ॥ ध्रुवम् ॥ घनचयरुचिरे रचयति
चिकुरे तरलिततरुणानने कुरवककुसुमं चपलासुषमं रतिपतिमृगकानने । रमते० ॥ २ ॥
घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते मणिसरममलं तारकपटलं नखपदश
शिभूषिते । रमते० ॥ ३ ॥ जितबिसशकले मृदुभुजयुगले करतलनलिनीदले मरकतवल
यं मधुकरनिचयं वितरति हिमशीतले । रमते० ॥ ४ ॥ रतिगृहजघने विपुलापघने मनसि
ज कनकासने मणिमयरसनं तोरणहसनं विकिरति कृतवासने । रमते० ॥ ५ ॥ चरण
किशलये कमलानिलये नखमणिगणपूजिते बहिरपवरणं यावकभरणं जनयति हृदये । जि

ने । रमते० ॥ ६ ॥ रमयतिसुभृशंकामपिसुदृशंखलहलधरसोदरे किमफलमवसंचिर
मिहविरसंवदसखिविटपोदरे । रमते० ॥ ७ ॥ इहरसभणनेकृतहरिगुणनेमधुरिपुपद
सेवके कलियुगचरितंनवसतुदुरितंकविनृपजयदेवके । रमते० ॥ ८ ॥ नायातःसखिनिर्द
योयदिशठस्त्वंदूतिकिंदूयसेस्वच्छन्दंबहुवल्लभःसरमतेकिंतत्रतेदूषणम् । पश्याद्यप्रियस
ङ्गमायदयितस्याकृष्यमाणंगुणैरुत्कण्ठार्त्तिभरादिवस्फुटदिदंचेतःस्वयंयास्यति ॥ १ ॥ ❁ ॥
देशवराडीरागरूपकतालाभ्याम् । अनिलतरलकुवलयनयनेन तपतिनसाकिशलयशयने
न । सखियारमितावनमालिना ॥ १ ॥ ध्रुवम् ॥ विकसितसरसिजललितमुखेन स्फुटति

नसामनसिजविशिखेन । सखिया॰ ॥ २ ॥ अमृतमधुरमृदुतरवचनेन ज्वलतिनसाम
लयजपवनेन । सखिया॰ ॥ ३ ॥ स्थलजलरुहरुचिकरचरणेन दहतिनसाहिमक
रकिरणेन । सखिया॰ ॥ ४ ॥ सजलजलदसमुदयरुचिरेण दलतिनसाहृदिविरह
भरेण । सखिया॰ ॥ ५ ॥ कनकनिकषरुचिशुचिवसनेन श्वसितिनसापरिजनहसने
न । सखिया॰ ॥ ६ ॥ सकलभुवनयुवजनतरुणेन वहतिनसारुजमतिकरुणेन । स
खिया॰ ॥ ७ ॥ श्रीजयदेवभणितवचनेन प्रविशतुहरिरपिहृदयमनेन । सखिया॰
॥ ८ ॥ मनोभवानन्दनचन्दनानिलप्रसीदरेदक्षिणमुञ्चवामताम् । क्षणंजगत्प्राणविधा

गी०गो० यमाधवंपुरो ममप्राणाहरोभविष्यसि ॥ १ ॥ रिपुरिवसखीसंवासोऽयंशिखीवहिमानिलो
॥२०॥ विषमिवसुधारश्मिर्यस्मिन्दुनोतिमनोगते । हृदयमदयेतस्मिन्नेवंपुनर्वलतेबलात्कुवल
यदृशांवामःकामोनिकामंनिरङ्कुशः ॥ २ ॥ बाधांविधेहिमलयानिलपञ्चबाणप्राणान्गृहा
णनगृहंपुनराश्रयिष्ये । किन्तेकृतान्तभगिनिक्षमयातरङ्गैरङ्गानिसिञ्चममशाम्यतुदेहदा
हः ॥ ३ ॥ सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरादानम्रैर्मुकुटेन्द्रनीलमणिभिः
सन्दर्शितेन्दिन्दिरम् । स्वच्छन्दंमकरन्दसुन्दरगलन्मन्दाकिनीमेदुरंश्रीगोविन्दपदारवि
न्दमशुभस्कन्दायवन्दामहे ॥ ४ ॥ ❁ ॥ इतिश्रीगीतगोविन्देविप्रलब्धावर्णनेनागरनाराय

योनामसप्तमस्सर्गः ॥ ७ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अथकथमपियामिनींविनीय
स्मरशरजर्ज्जरितापिसाप्रभाते । अनुनयवचनंवदन्तमग्रेप्रणतमपिप्रियमाहसाभ्य
सूयम् ॥ १ ॥ भैरवीरागयतितालाभ्याम् । रजनिजनितगुरुजागररागकषायित
मलसनिमेषं वहतिनयनमनुरागमिवस्फुटमुदितरसाभिनिवेशम् । हरिहरियाहि
माधवयाहिकेशवमावदकैतववादं तामनसरसरसीरुहलोचनयातवहरतिविषाद
म् ॥ १ ॥ ध्रुवम् ॥ कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपं दशनवसन
मरुणन्तवकृष्णतनोतितनोरनुरूपम् । हरिहरियाहि० ॥ २ ॥ वपुरनुहरतितवस्म

गी०गो० रसङ्गरखरनखरक्षतरेखं मरकतसकलकलितकलधौतलिपेरिवरतिजयलेखम्। ह
॥२१॥ रिहरियाहि० ॥ ३॥ चरणकमलगलदलक्तकसिक्तमिदंतवहृदयमुदारम् द
र्शयतीवबहिर्मदनद्रुमनवकिशलयपरिवारम्। हरिहरियाहि० ॥ ४॥ दशनपदम्भ
वदधरगतंममजनयतिचेतसिखेदं कथयतिकथमधुनापिमयासहतववपुरेतदभेद
म्। हरिहरियाहि० ॥ ५॥ बहिरिवमलिनतरंतवकृष्णमनोपिभविष्यतिनूनं कथ
मथवञ्चयसेजनमनुगतमसमशरज्वरदूनम्। हरिहरियाहि० ॥ ६॥ भ्रमतिभवान
बलाकबलायवनेषुकिमत्रविचित्रं प्रथयतिपूतनिकैववधूवधनिर्दयबालचरित्रम्। ह

रिहरियाहि° ॥ ७ ॥ श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापं शृणुतसु
धामधुरम्विबुधाविबुधालयतोपिदुरापम् । हरिहरियाहि° ॥ ८ ॥ तदेवंपश्यन्त्याः
प्रसरदनुरागंबहिरिवप्रियापादालक्तच्छुरितमरुणच्छायहृदयम् । ममाद्यप्रख्यातप्रण
यभरभङ्गेनकितवत्वदालोकःशोकादपिकिमपिलज्जांजनयति ॥ ९ ॥ प्रातर्नीलनिचो
लमच्युतमुरःसंवीतपीतांशुकंराधायाश्चकितंविलोक्यहसतिस्वैरंसखीमण्डले । व्रीडाचञ्च
लमञ्चलंनयनयोराधायराधाननेस्मेरःस्मेरमुखोऽयमस्तुजगदानन्दायनन्दात्मजः ॥ २ ॥
❁ ॥ इतिश्रीगीतगोविन्देखण्डितावर्णनेविलक्ष्यलक्ष्मीपतिर्नामाष्टमस्सर्गः ॥ ८ ॥

❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अथतांमन्मथखिन्नांरतिरसभिन्नांविषादसम्पन्नाम्। अनु
चिन्तितहरिचरितांकलहान्तरितामुवाचरहःसखी ॥१॥ रामकिरीरागयतिताला
भ्याम्। हरिरभिसरतिवहतिमधुपवने किमपरमधिकसुखंसखिभवने। माधवेमा
कुरुमानिनिमानमये ॥१॥ ध्रुवम्॥ तालफलादपिगुरुमतिसरसं किंविफलीकुरु
षेकुचकलशम्। माधवे० ॥२॥ कतिनकथितमिदमनुपदमचिरं मापरिहरहरि
मतिशयरुचिरम्। माधवे० ॥३॥ किमितिविषीदसिरोदिषिविकला विहसतियुव
तिसभातवसकला। माधवे० ॥४॥ सजलनलिनिदलशीलितशयने हरिमवलोकय

सफलयनयने। माधवे० ॥ ५॥ जनयसिमनसिकिमितिगुरुखेदं शृणुममवचनमनी

हितभेदम्। माधवे० ॥ ६ ॥ हरिरुपयातुवदतुबहुमधुरं किमितिकरोषिहृदयम

तिविधुरम्। माधवे० ॥ ७ ॥ श्रीजयदेवभणितमतिललितम् सुखयतुरसिकज

नंहरिचरितम्। माधवे० ॥ ८ ॥ स्निग्धेयत्परुषासियत्प्रणमतिस्तब्धासियद्रागिणिद्वे

षंयासियदुन्मुखेविमुखतांयातासितस्मिन्प्रिये। तद्युक्तंविपरीतकारिणितवश्रीखण्डचर्चा

विषंशीतांशुस्तपनोहिमंहुतवहः क्रीडामुदोयातनाः ॥ १ ॥ अन्तर्मोहनमौलिघूर्णन

चलन्मन्दारविस्रंसनस्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रःकुरङ्गीदृशाम्। दृप्यद्दानवद

यमानदिविषद्दुर्वारदुःखापदांभ्रंशःकंसरिपोर्व्यपोहतुसवःश्रेयांसिवंशीरवः ॥ २॥ ❁ ॥
इतिश्रीगीतगोविन्देकलहान्तरितावर्णनेमन्दमुकुन्दोनामनवमस्सर्गः ॥ ९ ॥ ❁ ॥
❁ ॥ ❁ ॥ ❁ ॥ अत्रान्तरेमसृणरोषवशामसीमनिःश्वासनिःसहमुखींसुमुखीमुपेत्य
। सव्रीडमीक्षितसखीवदनांदिनान्तेसानन्दगद्गदपदंहरिरित्युवाच ॥ १॥ देशवराडी
रागाष्टतालीतालौ । वदसियदिकिञ्चिदपिदन्तरुचिकौमुदीहरतिदरतिमिरमतिघो
रं स्फुरदधरसीधवेतववदनचन्द्रमारोचयतिलोचनचकोरम् । प्रियेचारुशीलेमुञ्चमयिमा
नमनिदानं सपदिमदनानलोदहतिममानसंदेहिमुखकमलमधुपानम् ॥ १॥ ध्रुवम् ॥

सत्यमेवासियदिसुदतिमयिकोपिनीदेहिखरनखरशरघातं घटयभुजबन्धनंजनयर
दखण्डनंयेनवाभवतिसुखजातम् । प्रिये० ॥ २ ॥ त्वमसिममभूषणंत्वमसिममजीवनं
त्वमसिममभवजलधिरत्नं भवतुभवतीहमयिसततमनुरोधिनीतत्रममहृदयमतियत्नम् ।
प्रिये० ॥ ३ ॥ नीलनलिनाभमपितन्वितवलोचनंधारयतिकोकनदरूपं कुसुमशरबा
णभावेनयदिरञ्जयसिकृष्णमिदमेतदनुरूपम् । प्रिये० ॥ ४ ॥ स्फुरतुकुचकुम्भयोरु
परिमणिमञ्जरीरञ्जयतुतवहृदयदेशं रसतुरसनापितवघनजघनमण्डलेघोषयतुमन्म
थनिदेशम् । प्रिये० ॥ ५ ॥ स्थलकमलगञ्जनंममहृदयरञ्जनंजनितरतिरङ्गपरभागं घ

णमसृणवाणिकरवाणिचरणद्वयंसरसलसदलक्तकरागम् । प्रिये० ॥ ६ ॥ स्मरगर
लखण्डनंममशिरसिमण्डनंदेहिपदपल्लवमुदारं ज्वलतिमयिदारुणोमदनकदनानलो
हरतुतदुपाहितविकारम् । प्रिये० ॥ ७ ॥ इतिचटुलचाटुपटुचारुमधुवैरिणोराधिका
मधिवचनजातं जयतिपद्मावतीरमणकविभारतीमानिनीजनजनितशातम् । प्रिये०
॥ ८ ॥ परिहरकृतातङ्केशङ्कांत्वयासततंघनस्तनजघनयाक्रान्तेस्वान्तेपरानवकाशिनि । वि
शतिवितनोरन्योधन्योनकोपिममान्तरंस्तनभरपरीरम्भारम्भेविधेहिविधेयताम् ॥ ९ ॥
मुग्धेविधेहिमयिनिर्दयदन्तदंशंदोर्वल्लिबन्धनिविडस्तनपीडनानि । चण्डित्वमेवमुदम

ञ्चयपञ्चबाणचाण्डालकाण्डदलनादसवः प्रयान्ति ॥ २ ॥ शशिमुखितवभातिभङ्गुरभ्रू
र्युवजनमोहकरालकालसर्प्पः । तदुदितभयभञ्जनाययूनांत्वदधरसीधुसुधैवसिद्ध
मन्त्रः ॥ ३ ॥ व्यथयतिवृथामौनंतन्विप्रपञ्चयपञ्चमंतरुणिमधुरालापैस्तापंविनोदयदृ
ष्टिभिः । सुमुखिविमुखीभावंतावद्विमुञ्चनवञ्चयस्वयमतिशयस्निग्धेमुग्धेप्रियोऽहमुपस्थि
तः ॥ ४ ॥ बन्धूकद्युतिबान्धवोऽयमधरस्निग्धोमधूकच्छविर्गण्डश्चण्डिचकास्तिनीलनलिन
श्रीमोचनंलोचनम् । नासाभ्येतितिलप्रसूनपदवींकुन्दाभदन्तिप्रियेप्रायस्त्वन्मुखसेवया
विजयतेविश्वंसपुष्पायुधः ॥ ५ ॥ दृशौतवमदालसेवदनमिन्दुमत्यान्वितंगतिर्जनम

नौरमाविधृतरम्भमूरुद्वयम् । रतिस्तवकलावतीरुचिरचित्रलेखेभ्रुवावहो विविधयौव
नंवहसितन्विपृथ्वीगता ॥ ६ ॥ प्रीतिंवस्तनुतांहरिःकुवलयापीडेनसार्द्धं रणेराधापीन
पयोधरस्मरणकृत्कुम्भेनसम्भेदवान् । यत्रस्विद्यतिमीलतिक्षणमथक्षिप्तेद्विपेतत्क्षणा
त्कंसस्यालमभूज्जितंजितमितिव्यामोहकोलाहलः ॥ ८ ॥ इतिश्रीगीतगोविन्देमानिनीव
र्णनेचतुरचतुर्भुजोनामदशमस्सर्गः ॥ १० ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ सुचिरमनुनयेनप्रीण
यित्वामृगाक्षींगतवतिकृतवेषेकेशवेकुञ्जशय्याम् । रचितरुचिरभूषांदृष्टिमोषेप्रदोषे
स्फुरतिनिरवसादांकापिराधांजगाद ॥ १ ॥ वसन्तरागयतितालाभ्याम् । विरचितचा

टुवचनरचनंचरणेरचितप्रणिपातं संप्रतिमञ्जुलवञ्जुलसीमनिकेलिशयनमनुयातम् ।
मुग्धेमधुमथनमनुगतमनुसरराधिके ॥ १ ॥ ध्रुवम् ॥ घनजघनस्तनभारभरेदरमन्थरच
रणविहारं मुखरितमणिमञ्जीरमुपैहिविधेहिमरालविकारम् । मुग्धे० ॥ २ ॥ शृणु
रमणीयतरंतरुणीजनमोहनमधुरिपुरावं कुसुमशरासनशासनवन्दिनिपिकनिकरेभ
जभावम् । मुग्धे० ॥ ३ ॥ अनिलतरलकिशलयनिकरेणकरेणलतानिकुरम्बं प्रेर
णमिवकरभोरुकरोतिगतिम्प्रतिमुञ्चविलम्बम् । मुग्धे० ॥ ४ ॥ स्फुरितमनङ्गतरङ्गव
शादिवसूचितहरिपरिरम्भं पृच्छमनोहरहारविमलजलधारममुंकुचकुम्भम् । मुग्धे०

॥ ५ ॥ अधिगतमखिलसखीभिरिदं तववपुरपिरतिरणसज्जं चण्डिरणितरसनारव
डिण्डिममभिसरसरसमलज्जम् । मुग्धे॰ ॥ ६ ॥ स्मरसरसुभगनखेनकरेणसखीमव
लंब्यसलीलं चलबलयक्कणितैरवबोधयहरिमपिनिजगतिशीलम् । मुग्धे ॥ ७ ॥ श्री
जयदेवभणितमधरीकृतहारमुदासितवामं हरिविनिहितमनसामधितिष्ठतुकण्ठतटीम
विरामम् । मुग्धे॰ ॥ ८ ॥ सामान्द्रक्ष्यतिवक्ष्यतिस्मरकथांप्रत्यङ्गमालिङ्गनैःप्रीतिंयास्य
तिरंस्यतेसखिसमागत्येतिचिन्ताकुलः । सत्वांपश्यतिकम्पतेपुलकयत्यानन्दतिस्विद्यति
प्रत्युद्गच्छतिमूर्च्छतिस्थिरतमःपुञ्जेनिकुञ्जेप्रियः ॥ ९ ॥ अक्ष्णोर्निक्षिपदञ्जनंश्रवणयो

स्तापिच्छगुच्छावलीं मूर्द्धि श्यामसरोजदाम कुचयोः कस्तूरिकापत्त्रकम्। धूर्त्तानामभिसार
सत्वरहृदां विष्वङ्निकुञ्जे सखि ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ॥ २ ॥
काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो मणिमञ्जरीभिः। एतत्तमालदलनी
लतमं तमिस्रन्तत्प्रेमहेमनिकषोपलतां तनोति ॥ ३ ॥ हारावलीतरलकाञ्चनकाञ्चिदा
मकेयूरकङ्कणमणिद्युतिदीपितस्य। द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य व्रीडावतीमथ
सखी निजगाद राधाम् ॥ ४ ॥ ❁ ॥ वराडीरागरूपकतालाभ्याम्। मञ्जुतरकुञ्जतलकेलि
सदने। प्रविश राधे माधवसमीपमिह विलस रतिरभसहसितवदने ॥ १ ॥ नवभवद

गी०गो० शोकदलशयनसारे । प्रविशराधेमाधवसमीपमिहविलसकुचकलशतरलहारे ॥ २ ॥
॥२७॥ कुसुमचयरचितशुचिवासगेहे । प्रविशराधेमाधवसमीपमिहविलसकुसुमसुकुमारदेहे
॥ ३ ॥ चलमलयजपवनसुरभिशीते । प्रविशराधेमाधवसमीपमिहविलसरतिवलित
ललितगीते ॥ ४ ॥ विततबहुवल्लिनवपल्लवघने । प्रविशराधेमाधवसमीपमिहविलस
चिरमिलितपीनजघने ॥ ५ ॥ मधुमुदितमधुपकुलकलितरावे । प्रविशराधेमाधवसमी
पमिहविलसमदनरभसरसभावे ॥ ६ ॥ मधुतरलपिकनिकरनिनदमुखरे । प्रवि
शराधेमाधवसमीपमिहविलसदशनरुचिरुचिरशिखरे ॥ ७ ॥ विहितपद्मावतीसु

खसमाजे । कुरु मुरारे मङ्गलशतानि भणति जयदेवकविराजराजे ॥ ८ ॥ त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः कन्दर्पेण च पातुमिच्छति सुधासम्बाधबिम्बाधरम् । अस्याङ्कं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दास इवोपसेवितपदाम्भोजे कुतः सम्भ्रमः ॥ १ ॥ सा ससाध्वससानन्दं गोविन्दे लोललोचना । सिञ्जानामञ्जुमञ्जीरं प्रविवेश निवेशनम् ॥ २ ॥ ❁ ॥ वराडीरागेण रूपकतालेन च । राधावदनविलोकनविकसितविविधविकारविभङ्गं जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम् । हरिमेकरसं चिरमभिलषितविलासं सा ददर्श गुरुहर्षवशंवदवदनमनङ्गविकाशम् ॥ १ ॥

गी०गो० ध्रुवम् ॥ हारममलतरतारमुरसिदधतंपरिरभ्यविदूरं स्फुटतरफेनकदम्बकरम्बित
 मिवयमुनाजलपूरम् । हरिमेकरसं० ॥ २ ॥ श्यामलमृदुलकलेवरमण्डलमधिगत
गौरदुकूलं नीलनलिनमिवपीतपरागपटलभरवलयितमूलम् । हरिमेकरसं० ॥ ३ ॥
तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागं स्फुटकमलोदरखेलितखञ्जनयुगमि
वशरदितडागम् । हरिमेकरसं० ॥ ४ ॥ वदनकमलपरिशीलनमिलितमिहिरसम
कुण्डलशोभं स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम् । हरिमेकरसं०
॥ ५ ॥ शशिकिरणच्छुरितोदरजलधरसुन्दरसकुसुमकेशं तिमिरोदितविधुमण्डल

निर्म्मलमलयजतिलकनिवेशम्। हरिमेकरसं० ॥ ६ ॥ विपुलपुलकभरदन्तुरितंर तिकेलिकलाभिरधीरं मणिगणकिरणसमूहसमुज्वलभूषणसुभगशरीरम्। हरिमेकरसं० ॥ ७ ॥ श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं प्रणमतहृदिविनिधायहरिंसुचिरंसुकृतोदयसारम्। हरिमेकरसं० ॥ ८ ॥ अतिक्रम्यापाङ्गंश्रवणपथपर्य्यन्तगमनप्रयासेनैवाक्ष्णोस्तरलतरतारंपतितयोः। इदानींराधायाःप्रियतमसमालोकसमयेपपातस्वेदाम्बुप्रसरइवहर्षाश्रुनिकरः ॥ १ ॥ भजन्त्यास्तल्पान्तंकृतकपटकण्डूतिपिहितस्मितेयातेगेहाद्बहिरवहितालीपरिजने। प्रियास्यंपश्यन्त्याःस्मरशर

वशाकूतसुभगंसलज्जायालज्जापिव्यगमदिवदूरंमृगदृशः ॥ २ ॥ जयश्रीविन्यस्तैर्म
हितइवमन्दारकुसुमैःस्वयंसिन्दूरेणद्विपरणमुदामुद्रितइव । भुजापीडक्रीडाहतकु
बलयापीडकरिणःप्रकीर्णासृग्विन्दुर्ज्जयतिभुजदण्डोमुरजितः ॥ ३ ॥ ❁ ॥ इतिश्री
गीतगोविन्देराधिकामीलनंनामैकादशस्सर्गः ॥ ११ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ गतवतिसखीवृ
न्दे मन्दत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधराम् । सरसमनसंदृष्ट्वाराधां
मुहुर्नवपल्लवप्रसरशयने निक्षिप्ताक्षीमुवाचहरिःप्रियाम् ॥ १ ॥ विभासरागैकताली
तालाभ्याम् । किशलयशयनतलेकुरुकामिनिचरणनलिनविनिवेशं तवपदपल्लववै

रिपरभवमिदमनुभवतुसुवेशम् । क्षणमधुनानारायणमनुगतमनुसरराधिके ॥ १ ॥
ध्रुवम् ॥ करकमलेनकरोमिचरणमहमागमितासिविदूरं क्षणमुपकुरुशयनोपरिमामि
वनूपुरमनुगतिशूरम् । क्षणमधुना० ॥ २ ॥ वदनसुधानिधिगलितममृतमिवरचय
वचनमनुकूलं विरहमिवापनयामिपयोधररोधकमुरसिदुकूलम् । क्षणमधुना० ॥ ३ ॥
प्रियपरिरम्भणरभसवलितमिवपुलकितमतिदुरवापं मदुरसिकुचकलशंविनिवेशयशो
षयमनसिजतापम् । क्षणमधुना० ॥ ४ ॥ अधरसुधारसमुपनयभामिनिजीवयमृत
मिवदासं त्वयिविनिहितमनसंविरहानलदग्धवपुषमविलासम् । क्षणमधुना० ॥ ५ ॥ श

शिमुखिमुखरयमणिरसनागुणमनुगुणकण्ठनिनादं ममश्रुतियुगलेपिकरुतविकलेश्रम
यच्चिरादवसादम् । क्षणमधुना० ॥ ६ ॥ मामतिविफलरुषाविकलीकृतमवलोकितुमधु
नेदं मीलितलज्जितमिवनयनन्तवविरमविसृजरतिखेदम् । क्षणमधुना० ॥ ७ ॥ श्री
जयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं जनयतुरसिकजनेषुमनोरमरतिरस
भावविनोदम् । क्षणमधुना ॥ ८ ॥ प्रत्यूहःपुलकाङ्कुरेणनिविडाश्लेषेनिमेषेण चक्री
डाकूतविलोकितेऽधरसुधापानेकथाकेलिभिः । आनन्दाधिगमेनमन्मथकलायुद्धेपियस्मि
न्नभूदुद्भूतःसतयोर्वभूवसुरतारम्भःप्रियम्भावुकः ॥ १ ॥ दोर्भ्यांसंयमितःपयोधरभरेण

पीडितःपाणिजैर्विद्धोदशनैःक्षताधरपुटःश्रोणीतटेनाहतः। हस्तेनानमितःकचेऽधर
मधुस्पन्देनसम्मोहितःकान्तःकामपितृप्तिमापतदहोकामस्यवामागतिः॥ २॥ माराङ्केर
तिकेलिसङ्कुलरणारम्भेतयासाहसप्रायंकान्तजयायकिञ्चिदुपरिप्रारम्भियत्सम्भ्रमात्।
निष्पन्दाजघनस्थलीशिथिलितादोर्वल्लिरुत्कम्पितंवक्षोमीलितमक्षिपौरुषरसःस्त्रीणांकु
तःसिद्ध्यति॥ ३॥ तस्याःपाटलपाणिजाङ्कितमुरोनिद्राकषायेदृशौनिर्द्धूतोऽधरशोणि
माविलुलितस्रस्तस्रजोमूर्द्धजाः। काञ्चीदामदरश्लथाञ्चलमितिप्रातर्निखातैर्दृशोरेभिःका
मशरैस्तदद्भुतमभूत्पत्युर्मनःकीलितम्॥ ४॥ त्वामप्राप्यमयिस्वयंवरपरांक्षीरोदतीरे

गी०गो० दरेशङ्कसुन्दरिकालकूटमपिबन्मूढोमृडानीपतिः । इत्थंपूर्व्वकथाभिरन्यमनसोनिक्षिप्य

॥३१॥ वामाञ्चलंराधायास्तनकोरकोपरिचलन्नेत्रोहरिःपातुवः ॥ ५ ॥ व्यालोलःकेशपाशस्तरलि
तमलकैःस्वेदलोलौकपोलौस्पष्टादष्टाधरश्रीःकुचकलसरुचाहारिताहारयष्टिः । काञ्ची
काञ्चिद्गताशांस्तनजघनपदंपाणिनाच्छाद्यसद्यःपश्यन्तीह्यात्मरूपन्तदपिविलुलितस्रग्ध
रेयंधिनोति ॥ ६ ॥ ईषन्मीलितदृष्टिमुग्धहसितंसीत्कारधारावशादव्यक्ताकुलकेलिका
कुविकसद्दन्तांशुधौताधरम् । श्वासोन्नद्धपयोधरोपरिपरिष्वङ्गात्कुरङ्गीदृशोहर्षोत्कर्षवि
मुक्तिनिःसहतनोर्धन्योधयत्याननम् ॥ ७ ॥ अथसहसासन्तुष्टंसुरतान्तेसानितान्त

खिन्नाङ्गी। राधाजगादसादरमिदमानन्देनगोविन्दम्॥ ८॥ ❁॥ रामकिरीरागय
तितालाभ्याम्। कुरुयदुनन्दनचन्दनशिशिरतरेणकरेणपयोधरे मृगमदपत्रकमत्र
मनोभवमङ्गलकलशसहोदरे। निजगादसायदुनन्दने क्रीडतिहृदयानन्दने॥१॥
ध्रुवम्॥ अलिकुलगञ्जनमञ्जनकंरतिनायकशायकमोचने त्वदधरचुम्बनलम्बितक
ज्जलमुज्ज्वलयप्रियलोचने। निजगादसा०॥२॥ नयनकुरङ्गतरङ्गविकाशनिरासकरे
श्रुतिमण्डले मनसिजपाशविलासधरेशुभवेषनिवेशयकुण्डले। निजगादसा०॥३॥
भ्रमरचयंरचयन्तमुपरिरुचिरंसुचिरंममसम्मुखे जितकमलेविमलेपरिकर्म्मयनर्म्मज

गी०गो० नकमलकंसखे। निजगादसा० ॥ ४ ॥ मृगमदरसवलितंललितंकुरुतिलकमलिकर
॥३२॥ जनीकरे विहितकलङ्ककलंकमलाननविश्रमितश्रमसीकरे । निजगादसा० ॥ ५ ॥ म
मरुचिरेचिकुरेकुरुमानदमनसिजध्वजचामरे रतिगलितेललितेकुसुमानिशिखण्डिशि
खण्डकडामरे। निजगादसा० ॥ ६ ॥ सरसघनेजघनेममशम्बरदारणवारणकन्द
रे मणिरसनावसनाभरणानिशुभाशयवासयसुन्दरे । निजगादसा० ॥ ७ ॥ श्री
जयदेववचसिशुभदेसदयंहृदयंकुरुमण्डने हरिचरणस्मरणामृतकृतकलिकलुषज्वर
खण्डने । निजगादसा० ॥ ८ ॥ रचयकुचयोःपत्रंचित्रंकुरुष्वकपोलयोर्घटयजघने

काञ्चीमञ्चयस्रजाकबरीभरम्। कलयवलयश्रेणीं पाणौपदेकुरुनूपुरावितिनिगदितः
प्रीतःपीताम्बरोपितथाकरोत् ॥ १ ॥ पर्य्यङ्कीकृतनागनायकफणाश्रेणीमणीनांगणे
संक्रान्तप्रतिबिम्बसम्बलनयाबिभ्रद्विभुप्रक्रियाम् । पादाम्भोरुहधारिवारिधिसुताम
क्ष्णांदिदृक्षुःशतैःकायव्यूहमिवाचरन्नुपचितीभूतोहरिःपातुवः ॥ २ ॥ यद्गान्धर्व्वक
लासुकौशलमनुध्यानञ्चयद्वैष्णवंयच्छृङ्गारविवेकतत्त्वमपियत्काव्येषुलीलायितम् ।
तत्सर्व्वंजयदेवपण्डितकवेःकृष्णैकतानात्मनःसानन्दाःपरिशोधयन्तुसुधियःश्रीगीतगोवि
न्दतः ॥ ३ ॥ श्रीभोजदेवप्रभवस्यरामदेवीसुतश्रीजयदेवकस्य। पराशरादिप्रियवर्ग

कण्ठेश्रीगीतगोविन्दकवित्वमस्तु ॥ ४ ॥ ❁ ॥ इतिश्रीगीतगोविन्देसुप्रीतपीताम्बरोनामद्वा

दशस्सर्गः ॥ १२ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ ॥ ❁❁ ॥

वेदा ४ रुद्रै ११ र्न्निशेशो १ नवभि ९ रथकर २ श्चाष्टभि ८ खि ३ र्गजै ८
श्चवह्निः ३ श्लोकाश्चगीतंक्रमतइ ह्धृतंचाद्यसर्गेद्वितीये। इन्दु १ र्नागै ८ रथेन्दुः
१ करिभि ८ रपिशिखी ३ वह्निसर्गैचपक्षौ २ नागैः ८ षट् ६ तुर्य्यसर्गैविधु १ र
थकरिभि ८ र्ग्नौ १ र्गजैः ८ सायका ५ श्च ॥१॥ चन्द्रो १ भूतै ५ श्चचन्द्रः १ क
रिभि ८ रथशराः ५ पञ्चमेशीतरश्मि १ र्न्नागै ८ र्वह्नि ३ श्चषष्ठेनयनपरिमिता २ श्चा
ष्टभि ८ र्द्वौ २ गजै ८ श्च। चन्द्रो १ नागै ८ श्चचन्द्रः १ करिभि ८ रथयुगाः ४
सप्तमेशीतरश्मि १ र्न्नागै ८ र्द्वौ २ वष्टमेऽब्जः १ करिभि ८ रथकरौ २ नन्दसर्गै मृ

गाङ्कः १ ॥ २ ॥ नागै ८ रम्बा ७ श्वसर्गैर्दशमउडुपति १ र्नागसंख्यै ८ र्युगा ४ श्चना
गै ८ र्द्वौ २ नागसंख्यैः ८ शिवनयनमिता ३ रुद्रसंख्येक्षपेशः १ । नागै ८ र्न्नागा ८
श्चनागैः ८ श्रुतिमितितुलिताः ४ स्सूर्य्यसर्गैःकवीन्द्रैःश्लोकाःशीतांशुनन्दा ९१ मधुरत
रवचोगीतमग्न्यङ्कचन्द्रैः १९३ ॥ ३ ॥ अब्देभूताङ्गनागामृतकरकलिते १८६५
खाग्निसप्तेन्दु १७३० शाके पौषेकुहांभृगौचप्रविततमतिभिःशोधयित्वासुधीरैः । रा
धागोविन्दलीलाम्बुधिलहरिहरोमुन्द्रिकावर्णवृन्दैर्बाबूरामैस्तुविद्वद्द्विजकुलतिलकैर्ल्लेखि
तोऽयम्प्रबन्धः ॥ ४ ॥ ❁ ॥ ❁ ॥ ::::::::::::::::::::::::::::::::::::::::::::::: ॥ ❁ ॥ ❁ ॥

| पत्रे | पृष्ठे | पङ्क्तौ | मुख्यपाठः | पाठान्तरम् |
|---|---|---|---|---|
| १ | २ | १ | मालवगौडा | मालव |
| २ | २ | ५ | गुज्जरीरागनिःसार | गुर्ज्जरीरागप्रतिमठ |
| ३ | २ | ४ | वसन्तरागयति | वसन्तरागरूपक |
| ५ | १ | १ | समकिरीरागयति | रामकरीरागरूपक |
| ६ | २ | १ | गुज्जरीरागेणयति | गुर्ज्जरीरागेणप्रतिमठ |
| ९ | १ | ३ | गुज्जरीरागेणयति | गुर्ज्जरीरागेणप्रतिमठ |
| १३ | १ | ७ | वराडीरागेण | देशवराटीरागेण |
| १५ | २ | ६ | गोण्डकिरी | गुणकरी |
| १७ | १ | ४ | मालवरागयति | गौडामालवरागप्रतिमठ |
| १८ | १ | ३ | वसन्तरागयति | वसन्तरागेकताली |
| १९ | २ | ६ | देशवराडीराग | देशाखराग |

| पत्रे | पृष्ठे | पङ्क्तौ | मुख्यपाठः | पाठान्तरम् |
|---|---|---|---|---|
| २२ | २ | २ | रामकिरीरागयति | गुर्ज्जरीरागरूपक |
| २३ | २ | ४ | देशवराडीरागाष्टताली | देशवराडीरागरूपक |
| २५ | २ | ७ | वसन्तरागयति | वसन्तरागरूपक |
| २७ | १ | ६ | वराडीरागरूपक | वराडीरागाष्टताली |
| ३२ | १ | १ | रामकिरीरागयति | रामकरीरागरूपक |

| पत्रे | पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|
| १ | २ | ५ | हरे ॥ वसति | हरे ॥ २ ॥ वसति |
| १० | १ | ७ | नलाः | नरलाः |
| १८ | २ | ३ | नङ्गा । ६ ॥ | नङ्गा । कापि० ॥ ६ ॥ |

॥ श्रीगणेशायनमः ॥ ॐ ॥ अस्यश्रीभगवद्गीतामालामन्त्रस्य भगवान्वेदव्यासऋषिरनुष्टुप्छन्दः श्रीकृष्णःपरमात्मादेवता अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसेइतिबीजं सर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेतिशक्तिः अहन्त्वांसर्वपापेभ्योमोक्षयिष्यामिमाशुचइतिकीलकं श्रीकृष्णप्रीत्यर्थेजपेविनियोगः ॥ नैनंछिन्दन्तिशस्त्राणिनैनंदहतिपावक इत्यंगुष्ठाभ्यान्नमः । नचैनंक्लेदयन्त्यापोनशोषयतिमारुतइतितर्जनीभ्यान्नमः । अच्छेद्योयमदाह्योयमक्लेद्योशोष्यएवचेतिमध्यमाभ्यान्नमः । नित्यःसर्वगतःस्थाणुरचलोयंसनातनइत्यनामिकाभ्यान्नमः । पश्यमेपार्थरूपाणिशतशोथसहस्रश इतिकनिष्ठिकाभ्यांन

गीता मः । नानाविधानिदिव्यानिनानावर्णकृतानिचेतिकरतलकरपृष्ठाभ्यांनमः ॥ नैनंछिन्दन्ति
॥ १ ॥ शस्त्राणिनैनंदहतिपावकइतिहृदयायनमः । नचैनंक्लेदयंत्यापोनशोषयतिमारुत
इतिशिरसेस्वाहा । अछेद्योयमदाह्योयमक्लेद्योऽशोष्यएवचेतिशिखायैवषट् । नित्य
स्सर्वगतःस्थाणुरचलोयंसनातनइतिकवचायहुम् । पश्यमेपार्थरूपाणिशतशोऽथसहस्र
शइतिनेत्राभ्यांवौषट् । नानाविधानिदिव्यानिनानावर्णाकृतानिचेत्यस्त्रायफट् ॥ इतिन्या
सः ॥ अथध्यानम् ॥ पार्थायप्रतिवोधिताभगवतानारायणेनस्वयंव्यासेनग्रथितापुराण
मुनिनामध्येमहाभारते । अद्वैतामृतवर्षिणींभगवतीमष्टादसाध्यायिनीमम्बत्वामन

सन्दधामिभगवद्गीतेभवद्वेषिणीम् ॥ १ ॥ नमोस्तुतेव्यासविशालबुद्धेफुल्लारवि
न्दायतपत्रनेत्र । येनत्वयाभारततैलपूर्णःप्रज्वालितोज्ञानमयःप्रदीपः ॥ २ ॥ प्रपन्नपा
रिजातायतोत्रवेत्रैकपाणये । ज्ञानमुद्रायकृष्णायगीतामृतदुहेनमः ॥ ३ ॥ सर्वोपनि
षदोगावोदोग्धागोपालनन्दनः । पार्थोवत्सःसुधीर्भोक्तादुग्धंगीतामृतंमहत् ॥ ४ ॥ व
सुदेवसुतंदेवंकंसचाणूरमर्द्दनम् । देवकीपरमानन्दंकृष्णंवन्देजगद्गुरुम् ॥ ५ ॥
भीष्मद्रोणतटाजयद्रथजलागान्धारनीलोत्पलाशल्यग्राहवतीकृपेणवहिनीकर्णेनवेलाकुला
। अश्वत्थामविकर्णघोरमकरादुर्योधनावर्त्तिनीसोत्तीर्णाखलुपाण्डवार्णवनदीकैवर्त्तकःकेश

वः ॥ ६ ॥ पाराशर्य्यवचःसरोजममलंगीतार्थगन्धोत्कटंनानाख्यानककेसरंहरिकथासम्बो
धनाबोधितम् । लोकेसज्जनषट्पदैरहरहःपेपीयमानंमुदाभूयाद्भारतपङ्कजंकलिम
लप्रध्वंसिनःश्रेयसे ॥ ७ ॥ मूकंकरोतिवाचालंपङ्गुंलङ्घयतेगिरिम् । यत्कृपातमहंवन्देप
रमानन्दमाधवम् ॥ ८ ॥ यंब्रह्मावरुणेन्द्ररुद्रमरुतःस्तुन्वन्तिदिव्यैःस्तवैर्वेदैःसांगपदक्रमो
पनिषदैर्गायन्तियंसामगाः । ध्यानावस्थिततद्गतेनमनसापश्यन्तियंयोगिनोयस्यान्तंनवि
दुःसुरासुरगणादेवायतस्मैनमः ॥ ९ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥॥
॥ ॐ ॥ धृतराष्ट्रउवाच ॥ धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः । मामकाःपाण्डवाश्चैवकिम

कुर्व्वतसंजय ॥ १ ॥ संजयउवाच ॥ दृष्ट्वातुपाण्डवानीकंव्यूढन्दुर्य्योधनस्तदा । आचार्य्यमु
पसङ्गम्यराजावचनमब्रवीत् ॥ २ ॥ पश्यैताम्पाण्डुपुत्राणामाचार्य्यमहतींचमूम् । व्यूढान्द्रुप
दपुत्रेणतवशिष्येणधीमता ॥ ३ ॥ अत्रशूरामहेष्वासाभीमार्ज्जुनसमायुधि । युयुधानो
विराटश्चद्रुपदश्चमहारथः ॥ ४ ॥ धृष्टकेतुश्चेकितानःकाशिराजश्चवीर्य्यवान् । पुरुजि
त्कुन्तिभोजश्चशैब्यश्चनरपुङ्गवः ॥ ५ ॥ युधामन्युश्चविक्रान्तउत्तमौजाश्चवीर्य्यवान् ।
सौभद्रोद्रौपदेयाश्चसर्वएवमहारथाः ॥ ६ ॥ अस्माकन्तुविशिष्टायेतान्निबोधद्विजोत्तम
। नायकाममसैन्यस्यसंज्ञार्थंतान्ब्रवीमिते ॥ ७ ॥ भवान्भीष्मश्चकर्णश्चकृपश्चसमितिञ्जयः

गीता ।अश्वत्थामाविकर्णश्चसौमदत्तिस्तथैवच ॥ ८ ॥ अन्येचबहवःशूरामदर्थेत्यक्तजीविताः
॥ ३ ॥ ।नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः ॥ ९ ॥ अपर्य्याप्तन्तदस्माकम्बलम्भीष्माभिर
क्षितम् । पर्य्याप्तन्त्विदमेतेषाम्बलम्भीमाभिरक्षितम् ॥ १० ॥ अयनेषुचसर्वेषुयथाभा
गमवस्थिताः । भीष्ममेवाभिरक्षन्तुभवन्तःसर्वएवहि ॥ ११ ॥ तस्यसञ्जनयन्हर्षंकुरु
वृद्धःपितामहः । सिंहनादंविनद्योच्चैश्शङ्खन्दध्मौप्रतापवान् ॥ १२ ॥ ततश्शङ्खाश्चभे
र्य्यश्चपणवानकगोमुखाः । सहसैवाभ्यहन्यन्तसशब्दस्तुमुलोऽभवत् ॥ १३ ॥ ततःश्वेतै
र्हयैर्युक्तेमहतिस्यन्दनेस्थितौ । माधवःपाण्डवश्चैवदिव्यौशङ्खौप्रदध्मतुः ॥ १४ ॥ पाञ्च

जन्यंहृषीकेशोदेवदत्तन्धनञ्जयः । पौंड्रन्दध्मौमहाशङ्खम्भीमकर्मावृकोदरः ॥ १५ ॥ अ
नन्तविजयंराजाकुन्तीपुत्रोयुधिष्ठिरः । नकुलस्सहदेवश्चसुघोषमणिपुष्पकौ ॥ १६ ॥
काश्यश्चपरमेष्वासश्शिखण्डीचमहारथः । धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः
॥ १७ ॥ द्रुपदोद्रौपदेयाश्चसर्वशःपृथिवीपते । सौभद्रश्चमहाबाहुश्शङ्खान्दध्मुःपृथक्पृ
थक् ॥ १८ ॥ सघोषोधार्त्तराष्ट्राणांहृदयानिव्यदारयत् । नभश्चपृथिवींचैवतुमुलोव्यनुनाद
यन् ॥ १९ ॥ अथव्यवस्थितान्दृष्ट्वाधार्त्तराष्ट्रान्कपिध्वजः । प्रवृत्तेशस्त्रसम्पातेधनुरुद्य
म्यपाण्डवः ॥ २० ॥ हृषीकेशन्तदावाक्यमिदमाहमहीपते ॥ अर्ज्जुनउवाच ॥ सेनयोरुभ

योर्मध्येरथंस्थापयमेऽच्युत ॥ २१ ॥ यावदेतान्निरीक्षेऽहंयोद्धुकामानवस्थितान् । कैर्मया
सहयोद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेऽहंयएतेऽत्रसमागताः । धा
र्त्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः ॥ २३ ॥ सञ्जयउवाच ॥ एवमुक्तोहृषीकेशोगुडाके
शेनभारत । सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमम् ॥ २४ ॥ भीष्मद्रोणप्रमुखतस्सर्वेषां
ञ्चमहीक्षिताम् । उवाचपार्थपश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ तत्रापश्यत्स्थितान्पार्थः
पितॄनथपितामहान् । आचार्य्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥ श्वशु
रान्सुहृदश्चैवसेनयोरुभयोरपि । तान्समीक्ष्यसकौन्तेयःसर्वान्बन्धूनवस्थितान् ॥ २७ ॥

कृपयापरयाविष्टोविषीदन्निदमब्रवीत् ॥ अर्जुनउवाच ॥ दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुं
समुपस्थितम् ॥ २८ ॥ सीदन्तिममगात्राणिमुखञ्चपरिशुष्यति । वेपथुश्चशरीरेमे
रोमहर्षश्चजायते ॥ २९ ॥ गाण्डीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते । नचशक्नोम्यव
स्थातुम्भ्रमतीवचमेमनः ॥ ३० ॥ निमित्तानिचपश्यामिविपरीतानिकेशव । नचश्रेयोऽनु
पश्यामिहत्वास्वजनमाहवे ॥ ३१ ॥ नकांक्षेविजयंकृष्णनचराज्यंसुखानिच । किन्नोराज्ये
नगोविन्दकिम्भोगैर्जीवितेनवा ॥ ३२ ॥ येषामर्थेकांक्षितन्नोराज्यम्भोगाःसुखानिच । त
इमेऽवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच ॥ ३३ ॥ आचार्य्याःपितरःपुत्रास्तथैवचपितामहाः

। मातुलाःश्वशुराःपौत्राःश्यालाःसम्बन्धिनस्तथा ॥ ३४ ॥ एतान्नहन्तुमिच्छामिघ्नतोपिमधु

सूदन। अपित्रैलोक्यराज्यस्यहेतोःकिन्नुमहीकृते ॥ ३५ ॥ निहत्यधार्त्तराष्ट्रान्नःकाप्रीतिःस्या
ज्जनार्द्दन। पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥ तस्मान्नार्हावयंहन्तुंधार्त्त
राष्ट्रान्स्वबान्धवान्। स्वजनंहिकथंहत्वासुखिनःस्याममाधव ॥ ३७ ॥ यद्यप्येतेनपश्यन्ति
लोभोपहतचेतसः। कुलक्षयकृतन्दोषंमित्रद्रोहेचपातकम् ॥ ३८ ॥ कथन्नज्ञेयम
स्माभिःपापादस्मान्निवर्त्तितुम्। कुलक्षयकृतन्दोषम्प्रपश्यद्भिर्ज्जनार्द्दन ॥ ३९ ॥ कुलक्षये
प्रणश्यन्तिकुलधर्म्मास्सनातनाः। धर्म्मेनष्टेकुलंकृत्स्नमधर्म्मोऽभिभवत्युत ॥ ४० ॥ अध

र्म्माभिभवात्कृष्णप्रदुष्यन्तिकुलस्त्रियः। स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसङ्करः॥ ४१॥
सङ्करोनरकायैवकुलघ्नानांकुलस्यच। पतन्तिपितरोह्येषांलुप्तपिण्डोदकक्रियाः॥ ४२॥
दोषैरेतैःकुलघ्नानांवर्णसङ्करकारकैः। उत्साद्यन्तेजातिधर्माःकुलधर्म्माश्चशाश्वताः
॥ ४३॥ उत्सन्नकुलधर्माणांमनुष्याणांजनार्दन। नरकेनियतंवासोभवतीत्यनुशुश्रुमः
॥ ४४॥ अहोवतमहत्पापंकर्तुंव्यवसितावयं। यद्राज्यसुखलोभेनहन्तुंस्वजनमुद्यताः
॥ ४५॥ यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः। धार्त्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत्
॥ ४६॥ संजयउवाच॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत्। विसृज्यसशरंचा

पंशोकसंविग्नमानसः ॥ ४७ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे
श्रीकृष्णार्जुनसंवादेअर्जुनविषादोनामप्रथमोऽध्यायः ॥ १ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥
संजयउवाच ॥ तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणाम् । विषीदन्तमिदंवाक्यमुवाचमधुसू
दनः ॥ १॥ श्रीभगवानुवाच ॥ कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितम् । अनार्य्यजु
ष्टमस्वर्ग्यमकीर्त्तिकरमर्ज्जुन ॥ २ ॥ क्लैब्यंमास्मगमःपार्थनैतत्त्वय्युपपद्यते । क्षुद्रंहृदय
दौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप ॥ ३ ॥ अर्जुनउवाच ॥ कथंभीष्ममहंसंख्येद्रोणंचमधुसू
दन । इषुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन ॥ ४ ॥ गुरूनहत्वाहिमहानुभावा

च्छ्रेयोभोक्तुम्भैक्ष्यमपीहलोके। हत्वार्थकामांस्तुगुरूनिहैवभुञ्जीयभोगान्रुधिरप्रदिग्धान्
॥ ५॥ नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः। यानेवहत्वानजिजी
विषामस्तेऽवस्थिताःप्रमुखेधार्तराष्ट्राः॥ ६॥ कार्पण्यदोषोपहतस्वभावःपृच्छामित्वान्धर्म
सम्मूढचेताः। यच्छ्रेयःस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेऽहंशाधिमान्त्वाम्प्रपन्नम्॥ ७॥ नहि
प्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम्। अवाप्यभूमावसपत्नमृद्धंराज्यंसुरा
णामपिचाधिपत्यम्॥ ८॥ सञ्जयउवाच॥ एवमुक्त्वाहृषीकेशङ्गुडाकेशःपरन्तपः। न
योत्स्यइतिगोविन्दमुक्त्वातूष्णींबभूवह॥ ९॥ तमुवाचहृषीकेशःप्रहसन्निवभारत। सेन

योरुभयोर्मध्येविषीदन्तमिदम्वचः ॥ १० ॥ श्रीभगवानुवाच ॥ अशोच्यानन्वशोचस्त्वंप्र
ज्ञावादांश्चभाषसे । गतासूनगतासूंश्चनानुशोचन्तिपण्डिताः ॥ ११ ॥ नत्वेवाहञ्जातुना
सन्नत्वन्नेमेजनाधिपाः । नचैवनभविष्यामःसर्वेवयमतःपरम् ॥ १२ ॥ देहिनोस्मिन्यथा
देहेकौमारंयौवनञ्जरा । तथादेहान्तरप्राप्तिर्धीरस्तत्रनमुह्यति ॥ १३ ॥ मात्रास्पर्शास्तु
कौन्तेयशीतोष्णसुखदुःखदाः । आगमापायिनोनित्यास्तांस्तितिक्षस्वभारत ॥ १४ ॥ यंहि
नव्यथयन्त्येतेपुरुषम्पुरुषर्षभ । समदुःखसुखन्धीरंसोऽमृतत्वायकल्पते ॥ १५ ॥ ना
सतोविद्यतेभावोनाभावोविद्यतेसतः । उभयोरपिदृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥

अविनाशितुतद्विद्धियेनसर्वमिदन्ततम्। विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति॥ १७॥
अन्तवन्तइमेदेहानित्यस्योक्ताःशरीरिणः। अनाशिनोऽप्रमेयस्यतस्माद्युध्यस्वभारत
॥ १८॥ यएनंवेत्तिहन्तारंयश्चैनम्मन्यतेहतम्। उभौतौनविजानीतोनायंहन्तिनहन्यते
॥ १९॥ नजायतेम्रियतेवाकदाचिन्नायम्भूत्वाभवितावानभूयः। अजोनित्यःशाश्वतोऽयंपुरा
णोनहन्यतेहन्यमानेशरीरे॥ २०॥ वेदाविनाशिनंनित्यंयएनमजमव्ययम्। कथंसपुरुषःपा
र्थकंघातयतिहन्तिकम्॥ २१॥ वासांसिजीर्णानियथाविहायनवानिगृह्णातिनरोऽपराणि।
तथाशरीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही॥ २२॥ नैनंछिन्दन्तिशस्त्राणिनै

गीता नंदहतिपावकः। नचैनंक्लेदयन्त्यापोनशोषयतिमारुतः॥ २३॥ अच्छेद्योऽयमदाह्योऽ
॥ ८ ॥ यमक्लेद्योऽशोष्यएवच। नित्यःसर्वगतःस्थाणुरचलोऽयंसनातनः॥ २४॥ अव्यक्तोऽयम
चिन्त्योऽयमविकार्योऽयमुच्यते। तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि॥ २५॥ अथचैनं
नित्यजातंनित्यंवामन्यसेमृतम्। तथापित्वंमहाबाहोनैनंशोचितुमर्हसि॥ २६॥ जातस्यहि
ध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच। तस्मादपरिहार्येऽर्थेनत्वंशोचितुमर्हसि॥ २७॥ अव्यक्ता
दीनिभूतानिव्यक्तमध्यानिभारत। अव्यक्तनिधनान्येवतत्रकापरिदेवना॥ २८॥ आश्चर्य
वत्पश्यतिकश्चिदेनमाश्चर्यवद्वदतितथैवचान्यः। आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवे

दनचैवकश्चित् ॥ २९ ॥ देहीनित्यमवध्योऽयन्देहे सर्वस्यभारत । तस्मात्सर्वाणिभूतानि
नत्वंशोचितुमर्हसि ॥ ३० ॥ स्वधर्ममपिचावेक्ष्यनविकम्पितुमर्हसि । धर्म्याद्धियुद्धाच्छ्रेयोऽ
न्यत्क्षत्रियस्यनविद्यते ॥ ३१ ॥ यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतम् । सुखिनःक्षत्रि
याःपार्थलभन्तेयुद्धमीदृशम् ॥ ३२ ॥ अथचेत्त्वमिमन्धर्म्यंसंग्राममन्नकरिष्यसि । ततस्स्वध
र्मंकीर्त्तिंचहित्वापापमवाप्स्यसि ॥ ३३ ॥ अकीर्त्तिंचापिभूतानिकथयिष्यन्तितेऽव्ययाम् ।
सम्भावितस्यचाकीर्त्तिर्मरणादतिरिच्यते ॥ ३४ ॥ भयाद्रणादुपरतम्मंस्यन्तेत्वांमहार
थाः । येषाञ्चत्वम्बहुमतोभूत्वायास्यसिलाघवम् ॥ ३५ ॥ अवाच्यवादांश्चबहून्वदिष्य

गीता न्तितवाहिताः । निन्दन्तस्तवसामर्थ्यंततोदुःखतरंनुकिम् ॥ ३६ ॥ हतोवाप्राप्स्यसिस्वर्गं
॥ ९ ॥ जित्वावाभोक्ष्यसेमहीम् । तस्मादुत्तिष्ठकौन्तेययुद्धायकृतनिश्चयः ॥ ३७ ॥ सुखदुःखे
समेकृत्वालाभालाभौजयाजयौ । ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि ॥ ३८ ॥ एषाते
ऽभिहितासांख्येबुद्धिर्योगेत्विमांशृणु । बुद्ध्यायुक्तोययापार्थकर्मबन्धम्प्रहास्यसि ॥ ३९ ॥ ने
हाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते । स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ॥ ४० ॥
व्यवसायात्मिकाबुद्धिरेकेहकुरुनन्दन । बहुशाखाह्यनन्ताश्चबुद्धयोव्यवसायिनाम्
॥ ४१ ॥ यामिमाम्पुष्पितांवाचम्प्रवदन्त्यविपश्चितः । वेदवादरताःपार्थनान्यदस्तीति

वादिनः ॥ ४२ ॥ कामात्मानस्स्वर्गपराजन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलाम्भोगै
श्वर्य्यगतिम्प्रति ॥ ४३ ॥ भोगैश्वर्यप्रसक्तानान्तयापहृतचेतसाम् । व्यवसायात्मिकाबु
द्धिस्समाधौनविधीयते ॥ ४४ ॥ त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन । निर्द्वन्द्वोनित्यस
त्त्वस्थोनिर्योगक्षेमआत्मवान् ॥ ४५ ॥ यावानर्थउदपानेसर्वतस्संप्लुतोदके । तावान्स
र्वेषुवेदेषुब्राह्मणस्यविजानतः ॥ ४६ ॥ कर्मण्येवाधिकारस्तेमाफलेषुकदाचन । माक
र्मफलहेतुर्भूर्मातेसङ्गोस्त्वकर्मणि ॥ ४७ ॥ योगस्थःकुरुकर्माणिसङ्गन्त्यक्त्वाधनञ्जय ।
सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्यते ॥ ४८ ॥ दूरेणह्यवरङ्कर्मबुद्धियोगाद्धनञ्ज

य । बुद्धौशरणमन्विच्छकृपणाःफलहेतवः ॥ ४९ ॥ बुद्धियुक्तोजहातीहउभेसुकृत
दुष्कृते । तस्माद्योगाययुज्यस्वयोगःकर्मसुकौशलम् ॥ ५० ॥ कर्मजम्बुद्धियुक्ताहिफ
लन्त्यक्त्वामनीषिणः । जन्मबन्धविनिर्मुक्ताःपदङ्गच्छन्त्यनामयम् ॥ ५१ ॥ यदातेमोह
कलिलंबुद्धिर्व्यतितरिष्यति । तदागन्तासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ॥ ५२ ॥ श्रुति
विप्रतिपन्नातेयदास्थास्यतिनिश्चला । समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि ॥ ५३ ॥
अर्जुनउवाच ॥ स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव । स्थितधीःकिम्प्रभाषेतकिमा
सीतव्रजेतकिम् ॥ ५४ ॥ श्रीभगवानुवाच ॥ प्रजहातियदाकामान्सर्वान्पार्थमनोगतान् ।

आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥ दुःखेष्वनुद्विग्नमनाःसुखेषुविग
तस्पृहः । वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते ॥ ५६ ॥ यस्सर्वत्रानभिस्नेहस्तत्त
त्प्राप्यशुभाशुभम् । नाभिनन्दतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता ॥ ५७ ॥ यदासंहरते
चायंकूर्मोऽङ्गानीवसर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ५८ ॥ विषया
विनिवर्त्तन्तेनिराहारस्यदेहिनः । रसवर्ज्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते ॥ ५९ ॥ यत
तोह्यपिकौन्तेयपुरुषस्यविपश्चितः । इन्द्रियाणिप्रमाथीनिहरन्तिप्रसभंमनः ॥ ६० ॥
तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः । वशेहियस्येन्द्रियाणितस्यप्रज्ञाप्रतिष्ठिता।

गीता ॥ ६१ ॥ ध्यायतोविषयान्पुंसस्संगस्तेषूपजायते । सङ्गात्सञ्जायतेकामःकामात्क्रोधोऽभि
॥११॥ जायते ॥ ६२ ॥ क्रोधाद्भवतिसम्मोहस्संमोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद्बुद्धिनाशोबु
द्धिनाशात्प्रणश्यति ॥ ६३ ॥ रागद्वेषवियुक्तैस्तुविषयानिन्द्रियैश्चरन् । आत्मवश्यैर्वि
धेयात्माप्रसादमधिगच्छति ॥ ६४ ॥ प्रसादेसर्वदुःखानांहानिरस्योपजायते । प्रस
न्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठते ॥ ६५ ॥ नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना । न
चाभावयतश्शान्तिरशान्तस्यकुतःसुखम् ॥ ६६ ॥ इन्द्रियाणांहिचरतांयन्मनोनुवि
धीयते । तदस्यहरतिप्रज्ञांवायुर्नावमिवाम्भसि ॥ ६७ ॥ तस्माद्यस्यमहाबाहोनि

गृहीतानिसर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ६८ ॥ यानिशास
र्वभूतानान्तस्यांजागर्त्तिसंयमी । यस्याञ्जाग्रतिभूतानिसानिशापश्यतोमुनेः ॥ ६९ ॥ आ
पूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशन्तियद्वत् । तद्वत्कामायम्प्रविशन्तिसर्वेसशा
न्तिमाप्नोतिनकामकामी ॥ ७० ॥ विहायकामान्यस्सर्वान्पुमांश्चरतिनिस्पृहः । निर्म
मोनिरहङ्कारस्सशान्तिमधिगच्छति ॥ ७१ ॥ एषाब्राह्मीस्थितिःपार्थनैनाम्प्राप्यविमुह्य
ति । स्थित्वास्यामन्तकालेपिब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥ इतिश्रीभगवद्गीतासू
पनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेसांख्ययोगोनामद्वितीयोऽध्यायः

गीता शिनस्सन्तोमुच्यन्तेसर्वकिल्बिषैः। भुञ्जतेतेत्वघम्पापायेपचन्त्यात्मकारणात् ॥ १३ ॥ अ
॥१३॥ न्नाद्भवन्तिभूतानिपर्ज्जन्यादन्नसम्भवः। यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः ॥ १४ ॥
कर्मब्रह्मोद्भवम्विद्धिब्रह्माक्षरसमुद्भवम्। तस्मात्सर्वगतम्ब्रह्मनित्यंयज्ञेप्रतिष्ठितम् ॥ १५ ॥
एवम्प्रवर्त्तितञ्चक्रन्नानुवर्त्तयतीहयः। अघायुरिन्द्रियारामोमोघम्पार्थसजीवति ॥ १६ ॥
यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः। आत्मन्येवचसन्तुष्टस्तस्यकार्यंनविद्यते ॥ १७ ॥
नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन। नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः ॥ १८ ॥ त
स्मादसक्तस्सततङ्कार्यङ्कर्मसमाचर। असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः ॥ १९ ॥

कर्म्मणैवहिसंसिद्धिमास्थिताजनकादयः। लोकसंग्रहमेवापिसम्पश्यन्कर्त्तुमर्हसि॥ २०॥
यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः। सयत्प्रमाणङ्कुरुतेलोकस्तदनुवर्त्तते॥ २१॥ न
मेपार्थास्तिकर्त्तव्यन्त्रिषुलोकेषुकिञ्चन। नानवाप्तमवाप्तव्यम्वर्त्तएवचकर्म्मणि॥ २२॥
यदिह्यहन्नवर्त्तेयञ्जातुकर्म्मण्यतन्द्रितः। ममवर्त्मानुवर्त्तन्तेमनुष्याःपार्थसर्व्वशः॥ २३॥
उत्सीदेयुरिमेलोकानकुर्य्याङ्कर्म्मचेदहम्। सङ्करस्यचकर्त्तास्यामुपहन्यामिमाःप्रजाः॥ २४॥
सक्ताःकर्म्मण्यविद्वांसोयथाकुर्वन्तिभारत। कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम्
॥ २५॥ नबुद्धिभेदञ्जनयेदज्ञानाङ्कर्म्मसङ्गिनाम्। जोषयेत्सर्वकर्म्माणिविद्वान्युक्तस्स

गीता माचरन् ॥ २६ ॥ प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्व्वशः । अहङ्कारविमूढात्माक
॥१५॥ र्ताहमितिमन्यते ॥ २७ ॥ तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः । गुणागुणेषुवर्त्तन्तइ
तिमत्वानसज्जते ॥ २८ ॥ प्रकृतेर्गुणसम्मूढाःसज्जन्तेगुणकर्मसु । तानकृत्स्नविदो
मन्दान्कृत्स्नविन्नविचालयेत् ॥ २९ ॥ मयिसर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसा । नि
राशीर्निर्ममोभूत्वायुध्यस्वविगतज्वरः ॥ ३० ॥ येमेमतमिदंनित्यमनुतिष्ठन्तिमानवाः । श्र
द्धावन्तोऽनसूयन्तोमुच्यन्तेतेपिकर्मभिः ॥ ३१ ॥ येत्वेतदभ्यसूयन्तोनानुतिष्ठन्तिमेम
तम् । सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः ॥ ३२ ॥ सदृशंचेष्टतेस्वस्याःप्रकृते

ज्ञानवानपि । प्रकृतिंयान्तिभूतानिनिग्रहःकिङ्करिष्यति ॥ ३३ ॥ इन्द्रियस्येन्द्रियस्या
र्थेरागद्वेषौव्यवस्थितौ । तयोर्नवशमागच्छेत्तौह्यस्यपरिपन्थिनौ ॥ ३४ ॥ श्रेयान्स्वध
र्मोविगुणःपरधर्मात्स्वनुष्ठितात् । स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः ॥ ३५ ॥ अर्जु
नउवाच ॥ अथकेनप्रयुक्तोऽयम्पापञ्चरतिपूरुषः । अनिच्छन्नपिवार्ष्णेयबलादिवनियो
जितः ॥ ३६ ॥ श्रीभगवानुवाच ॥ कामएषक्रोधएषरजोगुणसमुद्भवः । महाशनो
महापाप्माविद्ध्येनमिहवैरिणम् ॥ ३७॥ धूमेनाव्रियतेवह्निर्यथादर्शोमलेनच । यथोल्बे
नावृतोगर्भस्तथातेनेदमावृतम् ॥ ३८ ॥ आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा । का

गीता मरूपेणकौन्तेयदुःपूरेणानलेनच ॥ ३९ ॥ इन्द्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते
॥१५॥ । एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनम् ॥ ४० ॥ तस्मात्त्वमिन्द्रियाण्यादौनियम्यभर
तर्षभ । पाप्मानम्प्रजहिह्येनंज्ञानविज्ञाननाशनम् ॥ ४१ ॥ इन्द्रियाणिपराण्याहुरि
न्द्रियेभ्यःपरम्मनः । मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः ॥ ४२ ॥ एवम्बुद्धेःपरम्बुद्ध्वा
संस्तभ्यात्मानमात्मना । जहिशत्रुम्महाबाहोकामरूपन्दुरासदम् ॥ ४३ ॥ इतिश्री
भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेकर्मयोगोनामतृतीयो
ऽध्यायः ॥ ३ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ श्रीभगवानुवाच ॥ इमम्विवस्वतेयोग

म्प्रोक्तवानहमव्ययम् । विवस्वान्मनवेप्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवम्परम्प
राप्राप्तमिमंराजर्षयोविदुः । सकालेनेह महतायोगोनष्टःपरन्तप ॥ २ ॥ सएवायम्म
यातेऽद्ययोगःप्रोक्तःपुरातनः । भक्तोसिमेसखाचेति रहस्यंह्येतदुत्तमम् ॥ ३ ॥ अर्जुन
उवाच ॥ अपरम्भवतोजन्मपरञ्जन्मविवस्वतः । कथमेतद्विजानीयान्त्वमादौप्रोक्तवा
निति ॥ ४ ॥ श्रीभगवानुवाच ॥ बहूनिमेव्यतीतानिजन्मानितवचार्जुन । तान्यहम्वे
द सर्वाणिनत्वम्वेत्थपरन्तप ॥ ५ ॥ अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन् । प्रकृतिंस्वा
मधिष्ठायसम्भवाम्यात्ममायया ॥ ६ ॥ यदायदाहिधर्मस्यग्लानिर्भवतिभारत । अभ्यु

त्थानमधर्मस्यतदात्मानंसृजाम्यहम् ॥ ७ ॥ परित्राणायसाधूनांविनाशायचदुष्कृता
म् । धर्मसंस्थापनार्थायसम्भवामियुगेयुगे ॥ ८ ॥ जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्त्व
तः । त्यक्त्वादेहम्पुनर्जन्मनैतिमामेतिसोऽर्जुन ॥ ९ ॥ वीतरागभयक्रोधामन्मयामामुपा
श्रिताः । बहवोज्ञानतपसापूतामद्भावमागताः ॥ १० ॥ येयथामाम्प्रपद्यन्तेतांस्तथैवभ
जाम्यहम् । ममवर्त्मानुवर्त्तन्तेमनुष्याःपार्थसर्वशः ॥ ११ ॥ कांक्षन्तःकर्मणांसिद्धिंय
जन्तइहदेवताः । क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिकर्मजा ॥ १२ ॥ चातुर्वर्ण्यम्मया
सृष्टङ्गुणकर्मविभागशः । तस्यकर्त्तारमपिमाम्विद्ध्यकर्त्तारमव्ययम् ॥ १३ ॥ नमा

ङ्कर्माणिलिम्पन्तिनमेकर्मफलेस्पृहा । इतिमांयोभिजानातिकर्मभिर्नसबध्यते ॥ १४ ॥
एवंज्ञात्वाकृतङ्कर्म्मपूर्व्वैरपिमुमुक्षुभिः । कुरुकर्म्मैवतस्मात्त्वम्पूर्व्वैःपूर्वतरङ्कृतम् ॥ १५ ॥ कि
ङ्कर्मकिमकर्मेतिकवयोप्यत्रमोहिताः । तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेऽशुभात् ॥ १६ ॥
कर्मणोह्यपिबोद्धव्यम्बोद्धव्यञ्चविकर्मणः । अकर्मणश्चबोद्धव्यङ्गहनाकर्मणोगतिः ॥ १७ ॥
कर्मण्यकर्मयःपश्येदकर्मणिचकर्मयः । सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत् ॥ १८ ॥
यस्यसर्वेसमारम्भाःकामसङ्कल्पवर्जिताः । ज्ञानाग्निदग्धकर्माणन्तमाहुःपण्डितम्बु
धाः ॥ १९ ॥ त्यक्त्वाकर्मफलासङ्गन्नित्यतृप्तोनिराश्रयः । कर्मण्यभिप्रवृत्तोपिनैवकिञ्चि

 न्करोतिसः ॥ २० ॥ निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः । शारीरङ्केवलङ्कर्मकुर्वन्ना
 प्नोतिकिल्बिषम् ॥ २१ ॥ यदृच्छालाभसन्तुष्टोद्वन्द्वातीतोविमत्सरः । समःसिद्धावसि
द्धौचकृत्वापिननिबध्यते ॥ २२ ॥ गतसङ्गस्यमुक्तस्यज्ञानावस्थितचेतसः । यज्ञायाच
रतःकर्मसमग्रम्प्रविलीयते ॥ २३ ॥ ब्रह्मार्पणम्ब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतम् । ब्र
ह्मैवतेनगन्तव्यम्ब्रह्मकर्मसाधिना २४ ॥ दैवमेवापरेयज्ञंयोगिनःपर्युपासते । ब्रह्माग्ना
वपरेयज्ञंयज्ञेनैवोपजुह्वति ॥ २५ ॥ श्रोत्रादीनीन्द्रियाण्यन्येसंयमाग्निषुजुह्वति । श
ब्दादीन्विषयानन्येइन्द्रियाग्निषुजुह्वति ॥ २६ ॥ सर्वाणीन्द्रियकर्माणिप्राणकर्माणि

चापरे । आत्मसंयमयोगाग्नौजुह्वतिज्ञानदीपिते ॥ २७ ॥ द्रव्ययज्ञास्तपोयज्ञायो
गयज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्चयतयःसंशितव्रताः ॥ २८ ॥ अपानेजुह्वति
प्राणंप्राणेऽपानन्तथापरे । प्राणापानगतीरुद्ध्वाप्राणायामपरायणाः ॥ २९ ॥ अपरे
नियताहाराःप्राणान्प्राणेषुजुह्वति । सर्वेप्येतेयज्ञविदोयज्ञक्षयितकल्मषाः ॥ ३० ॥ य
ज्ञशिष्टामृतभुजोयान्तिब्रह्मसनातनम् । नायंलोकोस्त्ययज्ञस्यकुतोऽन्यःकुरुसत्तम ॥ ३१॥
एवम्बहुविधायज्ञावितताब्रह्मणोमुखे । कर्मजान्विद्धितान्सर्वानेवंज्ञात्वाविमोक्ष्यसे
॥ ३२ ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञःपरन्तप । सर्वंकर्माखिलम्पार्थज्ञानेपरिसमा

गीता प्यते ॥ ३३ ॥ तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया । उपदेक्ष्यन्तितेज्ञानंज्ञानिनस्त
॥१८॥ त्त्वदर्शिनः ॥ ३४॥ यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपाण्डव । येनभूतान्यशेषेणद्रक्ष्य
स्यात्मन्यथोमयि ॥ ३५ ॥ अपिचेदसिपापेभ्यःसर्वेभ्यःपापकृत्तमः । सर्वंज्ञानप्लवेनैव
वृजिनंसन्तरिष्यसि ॥ ३६ ॥ यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निस्स
र्वकर्माणिभस्मसात्कुरुतेतथा ॥ ३७ ॥ नहिज्ञानेनसदृशम्पवित्रमिहविद्यते । तत्स्व
यंयोगसंसिद्धःकालेनात्मनिविन्दति ॥ ३८ ॥ श्रद्धावाँल्लभतेज्ञानन्तत्परस्संयतेन्द्रियः
। ज्ञानंलब्ध्वापरांशान्तिमचिरेणाधिगच्छति ॥ ३९ ॥ अज्ञश्चाश्रद्दधानश्चसंशयात्मा

विनश्यति। नायंलोकोऽस्तिनपरोनसुखंसंशयात्मनः ॥४०॥ योगसंन्यस्तकर्माणंज्ञान
संछिन्नसंशयम्। आत्मवन्तन्नकर्माणिनिबध्नन्तिधनञ्जय ॥४१॥ तस्मादज्ञान
सम्भूतंहृत्स्थंज्ञानासिनात्मनः। छित्त्वैनंसंशयंयोगमातिष्ठोत्तिष्ठभारत ॥४२॥ इति
श्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेज्ञानयोगोनामच
तुर्थोऽध्यायः ॥४॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अर्जुनउवाच ॥ संन्यासङ्कर्मणांकृ
ष्णपुनर्योगञ्चशंससि। यच्छ्रेयएतयोरेकन्तन्मेब्रूहिसुनिश्चितम् ॥१॥ श्रीभगवानु
वाच ॥ संन्यासःकर्मयोगश्चनिःश्रेयसकरावुभौ। तयोस्तुकर्मसंन्यासात्कर्मयोगोविशि

गीता घ्यते ॥ २ ॥ ज्ञेयस्सनित्यसंन्यासीयोनद्वेष्टिनकांक्षति । निर्द्वन्द्वोहिमहाबाहोसु
॥१७॥ खम्बन्धात्प्रमुच्यते ॥ ३ ॥ सांख्ययोगौपृथग्बालाःप्रवदन्तिनपण्डिताः । एकमप्या
स्थितस्सम्यगुभयोर्विन्दतेफलम् ॥ ४ ॥ यत्सांख्यैःप्राप्यतेस्थानन्तद्योगैरपिगम्यते । ए
कंसांख्यञ्चयोगञ्चयःपश्यतिसपश्यति ॥ ५ ॥ संन्यासस्तुमहाबाहोदुःखमाप्तुमयोगतः ।
योगयुक्तोमुनिर्ब्रह्मनचिरेणाधिगच्छति ॥ ६ ॥ योगयुक्तोविशुद्धात्माविजितात्माजितेन्द्रि
यः । सर्वभूतात्मभूतात्माकुर्वन्नपिनलिप्यते ॥ ७ ॥ नैवकिञ्चित्करोमीतियुक्तोमन्येततत्त्ववि
त् । पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ॥ ८ ॥ प्रलपन्विसृजन्गृह्णन्नुन्मि

षन्निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्त इति धारयन् ॥ ९ ॥ ब्रह्मण्याधाय कर्मा
णि सङ्गन्त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥ कायेन मनसा
बुद्ध्या केवलैरिन्द्रियैरपि । योगिनः कर्म कुर्वन्ति सङ्गन्त्यक्त्वात्मशुद्धये ॥ ११ ॥ युक्तः क
र्मफलन्त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥
सर्वकर्माणि मनसा संन्यस्यास्ते सुखम्वशी । नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥
॥४०॥ न कर्तृत्वन्न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥ १४ ॥
२।५४ नादत्ते कस्यचित्पापन्न चैव सुकृतम्विभुः । अज्ञानेनावृतं ज्ञानन्तेन मुह्यन्ति जन्तवः

गीता ॥ १५ ॥ ज्ञानेनतुतदज्ञानंयेषान्नाशितमात्मनः । तेषामादित्यवज्ज्ञानम्प्रकाशयतितत्पर
॥२०॥ म् ॥ १६ ॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः । गच्छन्त्यपुनरावृत्तिंज्ञाननिर्धू
तकल्मषाः ॥ १७ ॥ विद्याविनयसम्पन्नेब्राह्मणेगविहस्तिनि । शुनिचैवश्वपाकेच
पण्डितास्समदर्शिनः ॥ १८ ॥ इहैवतैर्जितस्सर्गोयेषांसाम्येस्थितम्मनः । निर्दोषं
हिसमम्ब्रह्मतस्माद्ब्रह्मणितेस्थिताः ॥ १९ ॥ नप्रहृष्येत्प्रियम्प्राप्यनोद्विजेत्प्राप्यचाप्रि
यम् । स्थिरबुद्धिरसम्मूढोब्रह्मविद्ब्रह्मणिस्थितः ॥ २० ॥ बाह्यस्पर्शेष्वसक्तात्मावि
न्दत्यात्मनियत्सुखम् । सब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुते ॥ २१ ॥ येहिसंस्पर्शजाभो

गादुःखयोनयएवते । आद्यन्तवन्तःकौन्तेयनतेषुरमतेबुधः ॥ २२ ॥ शक्नोतीहैवयः
सोढुम्प्राक्शरीरविमोक्षणात् । कामक्रोधोद्भवम्वेगंसयुक्तस्ससुखीनरः ॥ २३ ॥ यो
ऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेवयः । सयोगीब्रह्मनिर्वाणम्ब्रह्मभूतोधिगच्छति
॥ २४ ॥ लभन्तेब्रह्मनिर्वाणमृषयःक्षीणकल्मषाः । छिन्नद्वैधायतात्मानस्सर्वभूतहिते
रताः ॥ २५ ॥ कामक्रोधवियुक्तानांयतीनांयतचेतसाम् । अभितोब्रह्मनिर्वाणंवर्त्तते
विदितात्मनाम् ॥ २६ ॥ स्पर्शान्कृत्वाबहिर्बाह्यांश्चक्षुश्चैवान्तरेभ्रुवोः । प्राणापानौस
मौकृत्वानासाभ्यन्तरचारिणौ ॥ २७ ॥ यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः । विगते

गीता ॥२१॥

च्छाभयक्रोधोयस्सदामुक्तएवसः ॥ २८ ॥ भोक्तारंयज्ञतपसांसर्वलोकमहेश्वरम् । सु
हृदंसर्वभूतानांज्ञात्वामांशान्तिमृच्छति ॥ २९ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्म
विद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेकर्मसंन्यासयोगोनामपञ्चमोऽध्यायः ॥ ५ ॥
॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ श्रीभगवानुवाच ॥ अनाश्रितःकर्मफलङ्कार्यङ्कर्मकरोतियः
। ससंन्यासीचयोगीचननिरग्निर्नचाक्रियः ॥ १ ॥ यंसंन्यासमितिप्राहुर्योगन्तंविद्धिपा
ण्डव । नह्यसंन्यस्तसङ्कल्पोयोगीभवतिकश्चन ॥ २ ॥ आरुरुक्षोर्मुनेर्योगङ्कर्मकार
णमुच्यते । योगारूढस्यतस्यैवशमःकारणमुच्यते ॥ ३ ॥ यदाहिनेन्द्रियार्थेषुनकर्मस्व

नुषज्जते । सर्वसङ्कल्पसन्यासीयोगारूढस्तदोच्यते ॥ ४ ॥ उद्धरेदात्मनात्मानन्नात्मा
नमवसादयेत् । आत्मैवह्यात्मनोबन्धुरात्मैवरिपुरात्मनः ॥ ५ ॥ बन्धुरात्मात्मनस्तस्ययेना
त्मैवात्मनाजितः । अनात्मनस्तुशत्रुत्वेवर्त्तेतात्मैवशत्रुवत् ॥ ६ ॥ जितात्मनःप्रशान्त
स्यपरमात्मासमाहितः । शीतोष्णसुखदुःखेषुतथामानापमानयोः ॥ ७ ॥ ज्ञानविज्ञान
तृप्तात्माकूटस्थोविजितेन्द्रियः । युक्तइत्युच्यतेयोगीसमलोष्टाश्मकाञ्चनः ॥ ८ ॥ सुहृ
न्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु । साधुष्वपिचपापेषुसमबुद्धिर्विशिष्यते ॥ ९ ॥
योगीयुञ्जीतसततमात्मानंरहसिस्थितः । एकाकीयतचित्तात्मानिराशीरपरिग्रहः ॥ १० ॥

शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः । नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरम्
॥ ११ ॥ तत्रैकाग्रंमनःकृत्वायतचित्तेन्द्रियक्रियः । उपविश्यासनेयुञ्ज्याद्योगमात्मवि
शुद्धये ॥ १२ ॥ समंकायशिरोग्रीवन्धारयन्नचलंस्थिरः । सम्प्रेक्ष्यनासिकाग्रंस्वन्दिश
श्चानवलोकयन् ॥ १३ ॥ प्रशान्तात्माविगतभीर्ब्रह्मचारिव्रतेस्थितः । मनःसंयम्यमच्चि
त्तोयुक्तआसीतमत्परः ॥ १४ ॥ युञ्जन्नेवंसदात्मानंयोगीनियतमानसः । शान्तिंनिर्वाण
परमांमत्संस्थामधिगच्छति ॥ १५ ॥ नात्यश्नतस्तुयोगोऽस्तिनचैकान्तमनश्नतः । न
चातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन ॥ १६ ॥ युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु ।

युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहा ॥ १७ ॥ यदाविनियतञ्चित्तमात्मन्येवावतिष्ठते
। निस्पृहस्सर्वकामेभ्योयुक्तइत्युच्यतेतदा ॥ १८ ॥ यथादीपोनिवातस्थोनेङ्गतेसोपमा
स्मृता । योगिनोयतचित्तस्ययुञ्जतोयोगमात्मनः ॥ १९ ॥ यत्रोपरमतेचित्तन्निरुद्धं
योगसेवया । यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति ॥ २० ॥ सुखमात्यंतिकंयत्तद्बुद्धि
ग्राह्यमतीन्द्रियम् । वेत्तियत्रनचैवायंस्थितश्चलतितत्वतः ॥ २१ ॥ यंलब्ध्वाचापरंला
भंमन्यतेनाधिकंततः । यस्मिन्स्थितोनदुःखेनगुरुणापिविचाल्यते ॥ २२ ॥ तंविद्यात्
दुःखसंयोगवियोगंयोगसंज्ञितम् । सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा ॥ २३ ॥

गीता संकल्पप्रभवान्कामांस्त्यक्त्वासर्वानशेषतः। मनसैवेन्द्रियग्रामंविनियम्यसमन्ततः॥ २४॥
॥२३॥ शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया। आत्मसंस्थंमनःकृत्वानकिंचिदपिचिन्तयेत्॥ २५॥
यतोयतोनिश्चरतिमनश्चञ्चलमस्थिरम्। ततस्ततोनियम्यैतदात्मन्येववशंनयेत्॥ २६॥
प्रशान्तमनसंह्येनंयोगिनंसुखमुत्तमं। उपैतिशांतरजसंब्रह्मभूतमकल्मषम्॥ २७॥
युञ्जन्नेवंसदात्मानंयोगीविगतकल्मषः। सुखेनब्रह्मसंस्पर्शमत्यन्तंसुखमश्नुते॥ २८॥ स
र्वभूतस्थमात्मानंसर्वभूतानिचात्मनि। ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः॥ २९॥ योमां
म्पश्यतिसर्वत्रसर्वंचमयिपश्यति। तस्याहंनप्रणश्यामिसचमेनप्रणश्यति॥ ३०॥ स

र्वभूतस्थितंयोमाम्भजत्येकत्वमास्थितः । सर्वथावर्त्तमानोऽपिसयोगीमयिवर्त्तते ॥ ३१ ॥
आत्मौपम्येनसर्वत्रसमम्पश्यतियोऽर्जुन। सुखंवायदिवादुःखंसयोगीपरमोमतः॥ ३२॥
अर्जुनउवाच ॥ योऽयंयोगस्त्वयाप्रोक्तस्साम्येनमधुसूदन। एतस्याहंनपश्यामिचञ्चल
त्वात्स्थितिंस्थिराम् ॥ ३३ ॥ चञ्चलंहिमनःकृष्णप्रमाथिबलवद्दृढम्। तस्याहंनिग्रहम्म
न्येवायोरिवसुदुष्करम् ॥ ३४ ॥ श्रीभगवानुवाच ॥ असंशयम्महाबाहोमनोदुर्नि
ग्रहञ्चलम् । अभ्यासेनतुकौन्तेयवैराग्येणचगृह्यते ॥ ३५ ॥ असंयतात्मनायोगोदुः
प्रापइतिमेमतिः । वश्यात्मनातुयतताशक्योवाप्तुमुपायतः ॥ ३६ ॥ अर्जुनउवाच ॥

गीता अयतिःश्रद्धयोपेतोयोगाच्चलितमानसः । अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छति
॥२४॥ ॥ ३७ ॥ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति । अप्रतिष्ठोमहाबाहोविमूढोब्रह्म
णःपथि ॥ ३८ ॥ एतन्मेसंशयंकृष्णच्छेत्तुमर्हस्यशेषतः । त्वदन्यःसंशयस्यास्यच्छेत्ता
नह्युपपद्यते ॥ ३९ ॥ श्रीभगवानुवाच ॥ पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते । न
हिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ॥ ४० ॥ प्राप्यपुण्यकृतांल्लोकानुषित्वाशाश्वतीः
समाः । शुचीनांश्रीमतांगेहेयोगभ्रष्टोऽभिजायते ॥ ४१ ॥ अथवायोगिनामेवकुलेभव
तिधीमताम् । एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं ॥ ४२ ॥ तत्रतंबुद्धिसंयोगंलभते

पौर्वदैहिकम् । यततेचततोभूयस्संसिद्धौकुरुनन्दन ॥ ४३ ॥ पूर्वाभ्यासेनतेनैवह्रि
यतेह्यवशोऽपिसः । जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्त्तते ॥ ४४ ॥ प्रयत्नाद्यतमान
स्तुयोगीसंशुद्धकिल्बिषः । अनेकजन्मसंसिद्धस्ततोयातिपराङ्गतिम् ॥ ४५ ॥ तपस्वि
भ्योऽधिकोयोगीज्ञानिभ्योऽपिमतोऽधिकः । कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन
॥ ४६ ॥ योगिनामपिसर्वेषांमद्गतेनान्तरात्मना । श्रद्धावान्भजतेयोमांसमेयुक्ततमोम
तः ॥ ४७ ॥ इतिश्रीभगवतगीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसं
वादेआत्मसंयमयोगोनामषष्ठोऽध्यायः ॥ ६ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ श्रीभगवानु

गीता वाच ॥ मय्यासक्तमनाःपार्थयोगंयुञ्जन्मदाश्रयः । असंशयंसमग्रम्मांयथाज्ञास्यसितच्छृ
॥२५॥ णु ॥ १ ॥ ज्ञानन्तेहंसविज्ञानमिदम्वक्ष्याम्यशेषतः । यज्ज्ञात्वानेहभूयोन्यज्ज्ञातव्यम
वशिष्यते ॥ २ ॥ मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये । यततामपिसिद्धानांकश्चि
न्मांवेत्तितत्त्वतः ॥ ३ ॥ भूमिरापोऽनलोवायुःखम्मनोबुद्धिरेवच । अहङ्कारइतीयंमे
भिन्नाप्रकृतिरष्टधा ॥ ४ ॥ अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपराम् । जीवभूतांमहा
बाहोययेदन्धार्यतेजगत् ॥ ५ ॥ एतद्योनीनिभूतानिसर्वाणीत्युपधारय । अहंकृ
त्स्नस्यजगतःप्रभवःप्रलयस्तथा ॥ ६ ॥ मत्तःपरतरन्नान्यत्किञ्चिदस्तिधनञ्जय । मयि

सर्वमिदम्प्रोतंसूत्रेमणिगणाइव ॥ ७ ॥ रसोऽहमप्सुकौन्तेयप्रभास्मिशशिसूर्ययोः ।
प्रणवस्सर्ववेदेषुशब्दःखेपौरुषंनृषु ॥ ८ ॥ पुण्योगन्धःपृथिव्यांचतेजश्चास्मिविभावसौ
। जीवनंसर्वभूतेषुतपश्चास्मितपस्विषु ॥ ९ ॥ बीजंमांसर्वभूतानांविद्धिपार्थसनातन
म् । बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनामहम् ॥ १० ॥ बलम्बलवताञ्चाहङ्कामराग
विवर्जितम् । धर्माविरुद्धोभूतेषुकामोऽस्मिभरतर्षभ ॥ ११ ॥ येचैवसात्त्विकाभावाराज
सास्तामसाश्चये । मत्तएवेतितान्विद्धिनत्वहन्तेषुतेमयि ॥ १२ ॥ त्रिभिर्गुणमयैर्भावैरेभि
स्सर्वमिदञ्जगत् । मोहितन्नाभिजानातिमामेभ्यःपरमव्ययम् ॥ १३ ॥ दैवीह्येषागुणमयी

गीता मममायादुरत्यया। मामेवयेप्रपद्यन्तेमायामेतान्तरन्तिते ॥ १४ ॥ नमान्दुष्कृतिनोमूढाः
॥२६॥ प्रपद्यन्तेनराधमाः । माययापहृतज्ञानाआसुरम्भावमाश्रिताः ॥ १५ ॥ चतुर्विधाभ
जन्तेमाञ्जनाःसुकृतिनोऽर्जुन। आर्त्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ ॥ १६ ॥ तेषां
ज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते । प्रियोहिज्ञानिनोऽत्यर्थमहंसचममप्रियः ॥ १७ ॥
उदाराःसर्वएवैतेज्ञानीत्वात्मैवमेमतं । आस्थितःसहियुक्तात्मामामेवानुत्तमाङ्गतिम्
॥ १८ ॥ बहूनाञ्जन्मनामन्तेज्ञानवान्माम्प्रपद्यते। वासुदेवःसर्वमितिसमहात्मासुदुर्लभ
भः ॥ १९ ॥ कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यन्तेऽन्यदेवताः। तन्तंनियममास्थायप्रकृत्यानियताः

स्वया ॥ २० ॥ योयोयांयांतनुम्भक्तश्श्रद्धयार्चितुमिच्छति । तस्यतस्याचलांश्रद्धान्तामे
वविदधाम्यहम् ॥ २१॥ सतयाश्रद्धयायुक्तस्तस्याराधनमीहते। लभतेचततःकामान्मयै
वविहितान्हितान् ॥ २२ ॥ अन्तवत्तुफलन्तेषान्तद्भवत्यल्पमेधसाम् । देवान्देवय
जोयान्तिमद्भक्तायान्तिमामपि ॥ २३ ॥ अव्यक्तंव्यक्तिमापन्नंमन्यन्तेमामबुद्धयः । प
रम्भावमजानन्तोममाव्ययमनुत्तमम् ॥ २४ ॥ नाहंप्रकाशस्सर्वस्ययोगमायासमावृ
तः । मूढोऽयंनाभिजानातिलोकोमामजमव्ययम् ॥ २५ ॥ वेदाहंसमतीतानिवर्त्तमाना
निचार्जुन । भविष्याणिचभूतानिमान्तुवेदनकश्चन ॥ २६ ॥ इच्छाद्वेषसमुत्थेनद्वन्द्व

 मोहेनभारत। सर्वभूतानिसंमोहंसर्गेयान्तिपरन्तप ॥ २७॥ येषान्त्वन्तगतम्पापञ्ज
 नानाम्पुण्यकर्मणाम्। तेद्वन्द्वमोहनिर्मुक्ताभजन्तेमांदृढव्रताः ॥ २८ ॥ जरामरणमो
क्षायमामाश्रित्ययतन्तिये। तेब्रह्मतद्विदुःकृत्स्नमध्यात्मङ्कर्मचाखिलम् ॥ २९ ॥ साधि
भूताधिदैवंमांसाधियज्ञञ्चयेविदुः। प्रयाणकालेपिचमान्तेविदुर्युक्तचेतसः ॥ ३० ॥ इ
तिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेविज्ञानयोगोना
मसप्तमोऽध्यायः॥ ७ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अर्जुनउवाच ॥ किन्तद्ब्रह्मकि
मध्यात्मङ्किङ्कर्मपुरुषोत्तम। अधिभूतञ्चकिम्प्रोक्तमधिदैवङ्किमुच्यते ॥ १॥ अधियज्ञः

कथङ्कोऽत्रदेहेऽस्मिन्मधुसूदन । प्रयाणकालेचकथंज्ञेयोऽसिनियतात्मभिः ॥ २ ॥ श्री
भगवानुवाच ॥ अक्षरम्ब्रह्मपरमंस्वभावोध्यात्ममुच्यते । भूतभावोऽद्भवकरोविसर्गःकर्मसं
ज्ञितः ॥ ३ ॥ अधिभूतंक्षरोभावःपुरुषश्चाधिदैवतम् । अधियज्ञोहमेवात्रदेहेदेहभृता
म्वर ॥ ४ ॥ अन्तकालेचमामेवस्मरन्मुक्त्वाकलेवरम् । यःप्रयातिसमद्भावंयातिनास्त्य
त्रसंशयः ॥ ५ ॥ यंयंवापिस्मरन्भावन्त्यजत्यन्तेकलेवरम् । तन्तमेवैतिकौन्तेयसदात
द्भावभावितः ॥ ६ ॥ तस्मात्सर्वेषुकालेषुमामनुस्मरयुध्यच । मय्यर्पितमनोबुद्धिर्मामेवै
ष्यस्यसंशयः ॥ ७ ॥ अभ्यासयोगयुक्तेनचेतसानान्यगामिना । परमम्पुरुषन्दिव्यंया

तिपार्थानुचिन्तयन् ॥ ८ ॥ कविम्पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः । स
र्वस्यधातारमचिन्त्यरूपमादित्यवर्णंतमसःपरस्तात् ॥ ९ ॥ प्रयाणकालेमनसाचलेन
भक्त्यायुक्तोयोगबलेनचैव । भ्रुवोर्मध्येप्राणमावेश्यसम्यक्सतम्परम्पुरुषमुपैतिदिव्यम्
॥ १० ॥ यदक्षरम्वेदविदोवदन्तिविशन्तियद्यतयोवीतरागाः । यदिच्छन्तोब्रह्मचर्यं
चरन्तितत्तेपदंसंग्रहेणप्रवक्ष्ये ॥ ११ ॥ सर्वद्वाराणिसंयम्यमनोहृदिनिरुध्यच । मूर्ध्न्याधा
यात्मनःप्राणमास्थितोयोगधारणाम् ॥ १२ ॥ ओमित्येकाक्षरम्ब्रह्मव्याहरन्मामनुस्मरन्
। यःप्रयातित्यजन्देहंसयातिपरमाङ्गतिम् ॥ १३ ॥ अनन्यचेतास्सततंयोमांस्मरति

नित्यशः । तस्याहंसुलभःपार्थनित्ययुक्तस्ययोगिनः ॥ १४ ॥ मामुपेत्यपुनर्जन्मदुःखाल
यमशाश्वतम् । नाप्नुवन्तिमहात्मानस्संसिद्धिम्परमाङ्गताः ॥ १५ ॥ आब्रह्मभुवना
ल्लोकाःपुनरावर्तिनोऽर्जुन । मामुपेत्यतुकौन्तेयपुनर्जन्मनविद्यते ॥ १६ ॥ सहस्रयुग
पर्यन्तमहर्यद्ब्रह्मणोविदुः । रात्रिंयुगसहस्रान्तान्तेऽहोरात्रविदोजनाः ॥ १७ ॥ अव्य
क्ताद्व्यक्तयस्सर्वाःप्रभवन्त्यहरागमे । रात्र्यागमेप्रलीयन्तेतत्रैवाव्यक्तसंज्ञके ॥ १८ ॥ भू
तग्रामःसएवायम्भूत्वाभूत्वाप्रलीयते । रात्र्यागमेवशःपार्थप्रभवत्यहरागमे ॥ १९ ॥ पर
स्तस्मात्तुभावोऽन्योव्यक्तोऽव्यक्तात्सनातनः । यस्ससर्वेषुभूतेषुनश्यत्सुनविनश्यति ॥ २० ॥

गीता अव्यक्तोक्षरइत्युक्तस्तमाहुःपरमाङ्गतिम् । यम्प्राप्यननिवर्त्तन्तेतद्धामपरमम्मम ॥ २१ ॥
॥२७॥ पुरुषस्सपरःपार्थभक्त्यालभ्यस्त्वनन्यया। यस्यान्तस्थानिभूतानियेनसर्वमिदन्ततम् ॥ २२ ॥
यत्रकालेत्वनावृत्तिमावृत्तिञ्चैवयोगिनः । प्रयातायान्तितङ्कालंवक्ष्यामिभरतर्षभ ॥ २३ ॥ अ
ग्निर्ज्योतिरहःशुक्लःषण्मासाउत्तरायणम् । तत्रप्रयातागच्छन्तिब्रह्मब्रह्मविदोजनाः ॥ २४ ॥
धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणायनम् । तत्रचान्द्रमसञ्ज्योतिर्योगीप्राप्यनिवर्त्तते
॥ २५ ॥ शुक्लकृष्णेगतीह्येतेजगतश्शाश्वतेमते । एकयायात्यनावृत्तिमन्ययावर्त्ततेपु
नः ॥ २६ ॥ नैतेसृतीपार्थजानन्योगीमुह्यतिकश्चन । तस्मात्सर्वेषुकालेषुयोगयुक्तोभ

वार्जुन ॥ २७ ॥ वेदेषुयज्ञेषुतपःसुचैवदानेषयत्पुण्यफलम्प्रदिष्टम् । अत्येतितत्स
र्वमिदम्विदित्वायोगीपरंस्थानमुपैतिचाद्यम् ॥ २८ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्र
ह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेऽक्षरपरब्रह्मयोगोनामअष्टमोऽध्यायः ॥ ८ ॥
❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ श्रीभगवानुवाच ॥ इदन्तुतेगुह्यतमम्प्रवक्ष्याम्यनसूयवे ।
ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसेऽशुभात् ॥ १ ॥ राजविद्याराजगुह्यम्पवित्रमिदमुत्त
मम् । प्रत्यक्षावगमन्धर्म्यंसुसुखङ्कर्तुमव्ययम् ॥ २ ॥ अश्रद्दधानाःपुरुषाधर्मस्यास्यपरन्त
प । अप्राप्यमांनिवर्तन्तेमृत्युसंसारवर्त्मनि ॥ ३ ॥ मयाततमिदंसर्वञ्जगदव्यक्तमूर्तिना ।

मत्स्थानिसर्वभूतानिनचाहन्तेष्ववस्थितः ॥ ४ ॥ नचमत्स्थानिभूतानिपश्यमेयोगमै
श्वरम्। भूतभृन्नचभूतस्थोममात्माभूतभावनः॥ ५॥ यथाकाशस्थितोनित्यंवायुःसर्वत्रगोम
हान्। तथासर्वाणिभूतानिमत्स्थानीत्युपधारय ॥ ६ ॥ सर्वभूतानिकौन्तेयप्रकृतिंया
न्तिमामकीम्। कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहम् ॥ ७ ॥ प्रकृतिंस्वामवष्टभ्यवि
सृजामिपुनःपुनः । भूतग्राममिमंकृत्स्नमवशम्प्रकृतेर्वशात् ॥ ८ ॥ नचमान्तानिकर्मा
णिनिबध्नन्तिधनञ्जय । उदासीनवदासीनमसक्तन्तेषुकर्मसु ॥ ९ ॥ मयाध्यक्षेण
प्रकृतिःसूयतेसचराचरम्। हेतुनानेनकौन्तेयजगद्विपरिवर्तते॥ १०॥ अवजानन्ति

मांमूढामानुषीन्तनुमाश्रितम् । परम्भावमजानन्तोममभूतमहेश्वरम् ॥ ११ ॥ मोघा
शामोघकर्माणोमोघज्ञानाविचेतसः । राक्षसीमासुरीञ्चैवप्रकृतिंमोहिनींश्रिताः ॥ १२ ॥
महात्मानस्तुमाम्पार्थदैवीम्प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसोज्ञात्वाभूतादिमव्ययम्
॥ १३ ॥ सततङ्कीर्तयन्तोमांयतन्तश्चदृढव्रताः । नमस्यन्तश्चमाम्भक्त्यानित्ययुक्ताउपासते
॥ १४ ॥ ज्ञानयज्ञेनचाप्यन्येयजन्तोमामुपासते । एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखम्
॥ १५ ॥ अहंक्रतुरहंयज्ञःस्वधाहमहमौषधम् । मन्त्रोहमहमेवाज्यमहमग्निरहंहु
तम् ॥ १६ ॥ पितामहस्यजगतोमाताधातापितामहः । वेद्यंपवित्रमोङ्कारऋक्सामय

ज्ञुरेव च ॥ १७ ॥ गतिर्भर्त्ताप्रभुस्साक्षीनिवासश्शरणंसुहृत् । प्रभवःप्रलयःस्थान
न्निधानम्बीजमव्ययम् ॥ १८ ॥ तपाम्यहमहम्वर्षंनिगृह्णाम्युत्सृजामि च । अमृतञ्चै
वमृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥ त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिम्प्रा
र्थयन्ते । तेपुण्यमासाद्यसुरेन्द्रलोकमश्नन्तिदिव्यान्दिविदेवभोगान् ॥ २० ॥ तेतम्भु
क्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्यलोकंविशन्ति । एवन्त्रयीधर्ममनुप्रपन्नागतागतङ्काम
कामालभन्ते ॥ २१ ॥ अनन्याश्चिन्तयन्तोमांयेजनाःपर्य्युपासते । तेषांनित्याभियुक्तानां
योगक्षेमम्वहाम्यहम् ॥ २२ ॥ येप्यन्यदेवताभक्तायजन्तेश्रद्धयान्विताः । तेपिमामेव

कौन्तेययजन्त्यविधिपूर्वकम् ॥ २३ ॥ अहंहिसर्वयज्ञानाम्भोक्ताचप्रभुरेवच । नतुमा
मभिजानन्तितत्त्वेनातश्च्यवन्तिते ॥ २४ ॥ यान्तिदेवव्रतादेवान्पितॄन्यान्तिपितृव्रताः ।
भूतानियान्तिभूतेज्यायान्तिमद्याजिनोऽपिमाम् ॥ २५ ॥ पत्रम्पुष्पंफलन्तोयंयोमेभ
क्त्याप्रयच्छति । तदहम्भक्त्युपहृतमश्नामिप्रयतात्मनः ॥ २६ ॥ यत्करोषियदश्नासि
यज्जुहोषिददासियत् । यत्तपस्यसिकौन्तेयतत्कुरुष्वमदर्पणम् ॥ २७ ॥ शुभाशुभ
फलैरेवम्मोक्ष्यसेकर्मबन्धनैः । संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि ॥ २८ ॥ समो
ऽहंसर्वभूतेषुनमेद्वेष्योऽस्तिनप्रियः । येभजन्तितुमाम्भक्त्यामयितेतेषुचाप्यहम् ॥ २९ ॥

गीता अपिचेत्सुदुराचारोभजतेमामनन्यभाक् । साधुरेवसन्तव्यःसम्यग्व्यवसितोहिसः ॥ ३० ॥
॥३२॥ क्षिप्रम्भवतिधर्मात्माशश्वच्छान्तिंनिगच्छति । कौन्तेयप्रतिजानीहिनमेभक्तःप्रणश्यति
॥ ३१ ॥ मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयः । स्त्रियोवैश्यास्तथाशूद्रास्तेपियान्ति
पराङ्गतिम् ॥ ३२ ॥ किम्पुनर्ब्राह्मणाःपुण्याभक्ताराजर्षयस्तथा । अनित्यमसुखंलोक
मिमम्प्राप्यभजस्वमाम् ॥ ३३ ॥ मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु । मामेवैष्यसि
युक्त्वैवमात्मानंमत्परायणः ॥ ३४ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशा
स्त्रेश्रीकृष्णार्जुनसम्वादेराजविद्याराजगुह्ययोगोनामनवमोऽध्यायः ॥ ९ ॥ ❁ ॥ ❁ ॥ ❁ ॥

॥ ❀ ॥ श्रीभगवानुवाच ॥ भूयएवमहाबाहोशृणुमेपरमम्वचः । यत्तेहम्प्रीयमाणा
यवक्ष्यामिहितकाम्यया ॥ १ ॥ नमेविदुःसुरगणाःप्रभवन्नमहर्षयः । अहमादिर्हि
देवानाम्महर्षीणाञ्चसर्वशः ॥ २ ॥ योमामजमनादिञ्चवेत्तिलोकमहेश्वरम् । अ
सम्मूढस्समर्त्त्येषुसर्वपापैःप्रमुच्यते ॥ ३ ॥ बुद्धिर्ज्ञानमसम्मोहःक्षमासत्यन्दमःशमः ।
सुखन्दुःखम्भवोभावोभयञ्चाभयमेवच ॥ ४ ॥ अहिंसासमतातुष्टिस्तपोदानंयशोऽय
शः । भवन्तिभावाभूतानाम्मत्तएवपृथग्विधाः ॥ ५ ॥ महर्षयःसप्तपूर्व्वेचत्वारोमनवस्त
था । मद्भावामानसाजातायेषांलोकइमाःप्रजाः ॥ ६ ॥ एतान्विभूतिंयोगञ्चममयो

गीता वेत्तितत्त्वतः। सोविकम्पेनयोगेनयुज्यतेनात्रसंशयः ॥ ७ ॥ अहंसर्वस्यप्रभवोमत्तःस
॥३३॥ र्व्वम्प्रवर्त्तते। इतिमत्वाभजन्तेमाम्बुधाभावसमन्विताः ॥ ८ ॥ मच्चित्तामद्गतप्राणाबोधय
न्तःपरस्परम्। कथयन्तश्चमान्नित्यन्तुष्यन्तिचरमन्तिच ॥ ९ ॥ तेषांसततयुक्ताना
म्भजताम्प्रीतिपूर्व्वकम्। ददामिबुद्धियोगन्तंयेनमामुपयान्तिते ॥ १० ॥ तेषामेवानु
कम्पार्थमहमज्ञानजन्तमः। नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता ॥ ११ ॥ अर्जु
नउवाच ॥ परम्ब्रह्मपरन्धामपवित्रम्परमम्भवान्। पुरुषंशाश्वतन्दिव्यमादिदेवमज
म्विभुम् ॥ १२ ॥ आहुस्त्वामृषयस्सर्व्वेदेवर्षिर्नारदस्तथा। असितोदेवलोव्यासस्स्व

यश्चैवब्रवीषिमे ॥ १३ ॥ सर्वमेतदृतम्मन्येयन्माम्वदसिकेशव । नहितेभगवन्व्यक्ति
म्विदुर्देवानदानवाः ॥ १४ ॥ स्वयमेवात्मनात्मानम्वेत्थत्वम्पुरुषोत्तम । भूतभावनभूतेश
देवदेवजगत्पते ॥ १५ ॥ वक्तुमर्हस्यशेषेणदिव्याह्यात्मविभूतयः । याभिर्विभूतिभि
र्लोकानिमांस्त्वंव्याप्यतिष्ठसि ॥ १६ ॥ कथम्विद्यामहंयोगिंस्त्वांसदापरिचिन्तयन् ।
केषुकेषुचभावेषुचिन्त्योऽसिभगवन्मया ॥ १७ ॥ विस्तरेणात्मनोयोगम्विभूतिञ्चजनार्द
न । भूयःकथयतृप्तिर्हिशृण्वतोनास्तिमेऽमृतम् ॥ १८ ॥ श्रीभगवानुवाच ॥ हन्ततेक
थयिष्यामिदिव्याह्यात्मविभूतयः । प्राधान्यतःकुरुश्रेष्ठनास्त्यन्तोविस्तरस्यमे ॥ १९ ॥

गीता अहमात्मागुडाकेश सर्वभूताशयस्थितः । अहमादिश्च मध्यञ्च भूतानामन्त एव च ॥ २० ॥
॥३४॥ आदित्यानामहम्विष्णुर्ज्योतिषां रविरंशुमान् । मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी
॥ २१ ॥ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः । इन्द्रियाणाम्मनश्चास्मि भूतानाम
स्मि चेतना ॥ २२ ॥ रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् । वसूनाम्पावकश्चा
स्मि मेरुः शिखरिणामहम् ॥ २३ ॥ पुरोधसाञ्च मुख्यम्मां विद्धि पार्थ वृहस्पतिम् । सेना
नीनामहं स्कन्दः सरसामस्मि सागरः ॥ २४ ॥ महर्षीणाम्भृगुरहङ्गिरामस्म्येकमक्षरम्
। यज्ञानाञ्जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥ अश्वत्थः सर्ववृक्षाणान्देवर्षीणाञ्च

नारदः । गन्धर्व्वाणाञ्चित्ररथःसिद्धानाङ्कपिलोमुनिः ॥ २६ ॥ उच्चैश्श्रवसमश्वाना
ञ्विद्धिमाममृतोद्भवम् । ऐरावतङ्गजेन्द्राणान्नराणाञ्चनराधिपम् ॥ २७ ॥ आयुधानाम
हम्वज्रन्धेनूनामस्मिकामधुक् । प्रजनश्चास्मिकन्दर्पस्सर्पाणामस्मिवासुकिः ॥ २८ ॥
अनन्तश्चास्मिनागानाम्वरुणोयादसामहम् । पितॄणामर्यमाचास्मियमस्संयमतामह
म् ॥ २९ ॥ प्रह्लादश्चास्मिदैत्यानाङ्कालःकलयतामहम् । मृगाणाञ्चमृगेन्द्रोहम्वैनते
यश्चपक्षिणाम् ॥ ३० ॥ पवनःपवतामस्मिरामश्शस्त्रभृतामहम् । झषाणाम्मकरश्चा
स्मिस्रोतसामस्मिजाह्नवी ॥ ३१ ॥ सर्गाणामादिरन्तश्चमध्यञ्चैवाहमर्जुन । अध्यात्म

 विद्याविद्यानाम्वादःप्रवदतामहम् ॥ ३२ ॥ अक्षराणामकारोऽस्मिद्वन्द्वस्सामासिकस्यच
 । अहमेवाक्षयःकालोधाताहम्विश्वतोमुखः ॥ ३३ ॥ मृत्युस्सर्वहरश्चाहमुद्भवश्चभविष्य
ताम् । कीर्त्तिःश्रीर्वाक्चनारीणांस्मृतिर्मेधाधृतिःक्षमा ॥ ३४ ॥ बृहत्सामतथासाम्नाङ्गायत्रीच्छ
न्दसामहम् । मासानाम्मार्गशीर्षोऽहमृतूनाङ्कुसुमाकरः ॥ ३५ ॥ द्यूतंछलयतामस्मितेज
स्तेजस्विनामहम् । जयोऽस्मिव्यवसायोऽस्मिसत्त्वंसत्त्ववतामहम् ॥ ३६ ॥ वृष्णीनांवासु
देवोऽस्मिपाण्डवानान्धनञ्जयः । मुनीनामप्यहंव्यासःकवीनामुशनाकविः ॥ ३७ ॥ दण्डो
दमयतामस्मिनीतिरस्मिजिगीषताम् । मौनञ्चैवास्मिगुह्यानांज्ञानंज्ञानवतामहम् ॥ ३८ ॥

यच्चापिसर्वभूतानाम्बीजन्तदहमर्जुन। नतदस्तिविनायत्स्यान्मयाभूतञ्चराचरम्॥ ३९॥
नान्तोस्तिममदिव्यानाम्विभूतीनाम्परन्तप। एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरोमया
॥ ४०॥ यद्यद्विभूतिमत्सत्त्वंश्रीमदूर्जितमेववा। तत्तदेवावगच्छत्वम्ममतेजोंऽशसम्भवम्
॥ ४१॥ अथवाबहुनैतेनकिंज्ञातेनतवार्जुन। विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोज
गत्॥ ४२॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनस
म्वादेविभूतियोगोनामदशमोऽध्यायः॥ १०॥ ❁॥ ❁॥ ❁॥ ❁॥ अर्जुनउवा
च॥ मदनुग्रहायपरमङ्गुह्यमध्यात्मसंज्ञितम्। यत्त्वयोक्तम्वचस्तेनमोहोऽयम्विगतोम

म ॥ १ ॥ भवाप्ययौहिभूतानांश्रुतौविस्तरशोमया। त्वत्तःकमलपत्राक्षमाहात्म्यमपिचाव्यय
म् ॥ २ ॥ एवमेतद्यथात्थत्वमात्मानम्परमेश्वर। द्रष्टुमिच्छामितेरूपमैश्वरम्पुरुषोत्त
म ॥ ३ ॥ मन्यसेयदितच्छक्यम्मयाद्रष्टुमितिप्रभो। योगेश्वरततोमेत्वन्दर्शयात्मानमव्यय
म् ॥ ४ ॥ श्रीभगवानुवाच ॥ पश्यमेपार्थरूपाणिशतशोऽथसहस्रशः। नानाविधानि
दिव्यानिनानावर्णाकृतीनिच ॥ ५ ॥ पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा। बहू
न्यदृष्टपूर्वाणिपश्याश्चर्याणिभारत ॥ ६ ॥ इहैकंयज्जगत्कृत्स्नम्पश्याद्यसचराच
रम्। ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥ ननुमांशक्यसेद्रष्टुमनेनैवस्वच

श्चुषा । दिव्यन्ददामिते चक्षुःपश्यमेयोगमैश्वरम् ॥ ८ ॥ संजयउवाच ॥ एवमुक्त्वा
ततोराजन्महायोगेश्वरोहरिः । दर्शयामासपार्थायपरमंरूपमैश्वरम् ॥ ९ ॥ अनेक
वक्त्रनयनमनेकाद्भुतदर्शनम् । अनेकदिव्याभरणन्दिव्यानेकोद्यतायुधम् ॥ १० ॥
दिव्यमाल्याम्बरधरन्दिव्यगन्धानुलेपनम् । सर्वाश्चर्यमयन्देवमनन्तम्विश्वतोमुखम्
॥ ११ ॥ दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता । यदिभासदृशीसास्याद्भासस्तस्यमहात्म
नः ॥ १२ ॥ तत्रैकस्थंजगत्कृत्स्नम्प्रविभक्तमनेकधा । अपश्यद्देवदेवस्यशरीरेपाण्ड
वस्तदा ॥ १३ ॥ ततःसविस्मयाविष्टोहृष्टरोमाधनञ्जयः । प्रणम्यशिरसादेवंकृताञ्ज

लिरभाषत ॥ १४ ॥ अर्जुनउवाच ॥ पश्यामिदेवांस्तवदेवदेहेसर्वांस्तथाभूतविशेषस
ङ्घान । ब्रह्माणमीशङ्कमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान् ॥ १५ ॥ अनेकबाहू
दरवक्त्रनेत्रम्पश्यामित्वांसर्वतोऽनन्तरूपम् । नान्तंनमध्यंनपुनस्तवादिम्पश्यामिविश्वे
श्वरविश्वरूपम् ॥ १६ ॥ किरीटिनङ्गदिनञ्चक्रिणञ्चतेजोराशिंसर्वतोदीप्तिमन्तम् । प
श्यामित्वान्दुर्न्निरीक्ष्यंसमन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥ त्वमक्षरम्परमम्वे
दितव्यन्त्वमस्यविश्वस्यपरन्निधानम् । त्वमव्ययःशाश्वतधर्मगोप्तासनातनस्त्वम्पुरुषोमतो
मे ॥ १८ ॥ अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुंशशिसूर्य्यनेत्रम् । पश्यामित्वान्दिप्तहु

नाशवक्त्रंस्वतेजसाविश्वमिदन्तपन्तम् ॥ १९ ॥ द्यावापृथिव्योरिदमन्तरंहिव्याप्तन्त्वयैकेन
दिशश्चसर्वाः । दृष्ट्वाद्भुतंरूपमुग्रन्तवेदंलोकत्रयम्प्रव्यथितम्महात्मन् ॥ २० ॥ अमीहित्वां
सुरसङ्घाविशन्तिकेचिद्भीताःप्राञ्जलयोगृणन्ति । स्वस्तीत्युक्त्वामहर्षिसिद्धसङ्घाःस्तुवन्ति
त्वांस्तुतिभिःपुष्कलाभिः ॥ २१ ॥ रुद्रादित्यावसवोयेचसाध्याविश्वेऽश्विनौमरुतश्चोष्मपाश्च
। गन्धर्वयक्षासुरसिद्धसङ्घावीक्षन्तेत्वाम्विस्मिताश्चैवसर्वे ॥ २२ ॥ रूपम्महत्तेबहुवक्त्रने
त्रम्महाबाहोबहुबाहूरुपादम् । बहूदरम्बहुदंष्ट्राकरालंदृष्ट्वालोकाःप्रव्यथितास्तथाहम्
॥ २३ ॥ नभस्पृशन्दीप्तमनेकवर्णंव्यात्ताननन्दीप्तविशालनेत्रम् । दृष्ट्वाहित्वाम्प्रव्यथितान्तरा

गीता त्माधृतिन्नविन्दामिशमञ्चविष्णो ॥ २४ ॥ दंष्ट्राकरालानिचतेमुखानिदृष्ट्वैवकालानलसन्नि
॥३८॥ भानि।दिशोनजानेनलभेचशर्मप्रसीददेवेशजगन्निवास ॥ २५ ॥ अमीचत्वांधृतराष्ट्र
स्यपुत्रास्सर्वेसहैवावनिपालसङ्घैः। भीष्मोद्रोणःसूतपुत्रस्तथासौसहास्मदीयैरपियोधमु
ख्यैः ॥ २६ ॥ वक्त्राणितेत्वरमाणाविशन्तिदंष्ट्राकरालानिभयानकानि । केचिद्विल
ग्नादशनान्तरेषुसंदृश्यन्तेचूर्णितैरुत्तमाङ्गैः ॥ २७ ॥ यथानदीनाम्बहवोऽम्बुवेगास्समुद्रमे
वाभिमुखाद्रवन्ति । तथातवामीनरलोकवीराविशन्तिवक्त्राण्यभिविज्वलन्ति ॥ २८ ॥
यथाप्रदीप्तंज्वलनम्पतङ्गाविशन्तिनाशायसमृद्धवेगाः । तथैवनाशायविशन्तिलोकास्त

वापिवक्त्राणिसमृद्धवेगाः ॥ २९ ॥ लेलिह्यसेग्रसमानस्समन्ताल्लोकान्समग्रान्वदनै
र्ज्वलद्भिः । तेजोभिरापूर्यजगत्समग्रम्भासस्तवोग्राःप्रतपन्तिविष्णो ॥ ३० ॥ आख्याहिमे
कोभवानुग्ररूपोनमोऽस्तुतेदेववरप्रसीद । विज्ञातुमिच्छामिभवन्तमाद्यन्नहिप्रजानामित
वप्रवृत्तिम् ॥ ३१ ॥ श्रीभगवानुवाच ॥ कालोऽस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाहर्तुमि
हप्रवृत्तः । ऋतेपित्वांनभविष्यन्तिसर्वेयेऽवस्थिताःप्रत्यनीकेषुयोधाः ॥ ३२ ॥ तस्मात्त्व
मुत्तिष्ठयशोलभस्वजित्वाशत्रून्भुंक्ष्वराज्यंसमृद्धम् । मयैवैतेनिहताःपूर्वमेवनिमित्तमात्र
म्भवसव्यसाचिन् ॥ ३३ ॥ द्रोणञ्चभीष्मञ्चजयद्रथञ्चकर्णन्तथान्यानपियोधवीरान्

। मयाहतांस्त्वञ्जहिमाव्यथिष्ठायुध्यस्वजेतासिरणेसपत्नान् ॥ ३४ ॥ सञ्जयउवाच ॥
एतच्छ्रुत्वावचनङ्केशवस्यकृताञ्जलिर्वेपमानःकिरीटी । नमस्कृत्वाभूयएवाहकृष्णंसगद्ग
दम्भीतभीतःप्रणम्य ॥ ३५ ॥ अर्जुनउवाच ॥ स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृष्यत्य
नुरज्यतेच । रक्षांसिभीतानिदिशोद्रवन्तिसर्वेनमस्यन्तिचसिद्धसङ्घाः ॥ ३६ ॥ क
स्माच्चतेननमेरन्महात्मन्गरीयसेब्रह्मणोप्यादिकर्त्रे । अनन्तदेवेशजगन्निवासत्वमक्षरंस
दसत्तत्परंयत् ॥ ३७ ॥ त्वमादिदेवःपुरुषःपुराणस्त्वमस्यविश्वस्यपरन्निधानम् । वे
त्तासिवेद्यञ्चपरञ्चधामत्वयाततम्विश्वमनन्तरूप ॥ ३८ ॥ वायुर्यमोऽग्निर्वरुणश्शशाङ्कः

प्रजापतिस्त्वम्प्रपितामहश्च । नमोनमस्तेऽस्तुसहस्रकृत्वःपुनश्चभूयोपिनमोनमस्ते ॥ ३९॥
नमःपुरस्तादथपृष्ठतस्तेनमोऽस्तुतेसर्वतएवसर्व । अनन्तवीर्यामितविक्रमस्त्वंसर्वंस
माप्नोषिततोऽसिसर्वः ॥ ४० ॥ सखेतिमत्वाप्रसभंयदुक्तंहेकृष्णहेयादवहेसखेति ।
अजानतामहिमानन्तवेदम्मयाप्रमादात्प्रणयेनवापि ॥ ४१॥ यच्चावहासार्थमसत्कृतोऽ
सिविहारशय्यासनभोजनेषु। एकोऽथवाप्यच्युततत्समक्षन्तत्क्षामयेत्वामहमप्रमेयम्
॥ ४२ ॥ पितासिलोकस्यचराचरस्यत्वमस्यपूज्यश्चगुरुर्गरीयान् । नत्वत्समोस्त्यभ्यधिकःकु
तोऽन्योलोकत्रयेप्यप्रतिमप्रभाव ॥ ४३॥ तस्मात्प्रणम्यप्रणिधायकायम्प्रसादयेत्वामहमी

शमीड्यम्। पितेवपुत्रस्यसखेवसख्युःप्रियःप्रियायार्हसिदेवसोढुम् ॥ ४४ ॥ अदृष्ट

पूर्वंहृषितोऽस्मिदृष्ट्वाभयेनचप्रव्यथितम्मनोमे। तदेवमेदर्शयदेवरूपम्प्रसीददेवेशजग
न्निवास ॥ ४५ ॥ किरीटिनङ्गदिनञ्चक्रहस्तमिच्छामित्वान्द्रष्टुमहन्तथैव। तेनैवरूपे
णचतुर्भुजेनसहस्रबाहोभवविश्वमूर्त्ते ॥ ४६ ॥ श्रीभगवानुवाच ॥ मयाप्रसन्नेनतवा
र्जुनेदंरूपम्परन्दर्शितमात्मयोगात्। तेजोमयम्विश्वमनन्तमाद्यंयन्मेत्वदन्येननदृष्टपू
र्वम् ॥ ४७ ॥ नवेदयज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः। एवंरूपश्शक्यअहं
न्नृलोकेद्रष्टुन्त्वदन्येनकुरुप्रवीर ॥ ४८ ॥ मातेव्यथामाचविमूढभावोदृष्ट्वारूपंघोरमी

दृष्टुमेतद् । व्यपेतभीः प्रीतमनाः पुनस्त्वन्तदेव मे रूपमिदम्प्रपश्य ॥ ४८ ॥ सञ्जय उ
वाच ॥ इत्यर्जुनम्वासुदेवस्तथोक्त्वा स्वकं रूपन्दर्शयामास भूयः । आश्वासयामास च भीत
मेनम्भूत्वा पुनस्सौम्यवपुर्महात्मा ॥ ४९ ॥ अर्जुन उवाच ॥ दृष्ट्वेदम्मानुषं रूपन्तव सौ
म्यञ्जनार्द्दन । इदानीमस्मि सम्वृत्तः सचेताः प्रकृतिङ्गतः ॥ ५० ॥ श्रीभगवानुवाच ॥ सु
दुर्द्दर्शमिदं रूपं दृष्टवानसि यन्मम । देवा अप्यस्य रूपस्य नित्यन्दर्शनकाङ्क्षिणः ॥ ५१ ॥
नाहम्वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवम्विधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५२ ॥
भक्त्या त्वनन्यया शक्य अहमेवम्विधोऽर्जुन । ज्ञातुन्द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तप ॥ ५३ ॥

गीता मत्कर्मकृन्मत्परमोमद्भक्तःसङ्गवर्जितः । निर्वैरःसर्वभूतेषुयःसमामेतिपाण्डव ॥ ५५ ॥
॥४१॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेविश्वरूपद
र्शनोनामैकादशोऽध्यायः ॥ ११ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अर्जुनउवाच ॥ एवं
सततयुक्तायेभक्तास्त्वाम्पर्युपासते । येचाप्यक्षरमव्यक्तन्तेषाङ्केयोगवित्तमाः ॥ १ ॥ श्रीभ
गवानुवाच ॥ मय्यावेश्यमनोयेमान्नित्ययुक्ताउपासते । श्रद्धयापरयोपेतास्तेमेयुक्ततमा
मताः ॥ २ ॥ येत्वक्षरमनिर्देश्यमव्यक्तम्पर्युपासते । सर्वत्रगमचिन्त्यञ्चकूटस्थमचलंध्रु
वम् ॥ ३ ॥ सन्नियम्येन्द्रियग्रामंसर्वत्रसमबुद्धयः । तेप्राप्नुवन्तिमामेवसर्वभूतहितेर

नाः ॥ ४ ॥ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् । अव्यक्ताहिगतिर्दुःखन्देहवद्भिर
वाप्यते ॥ ५ ॥ येतुसर्वाणिकर्माणिमयिसंन्यस्यमत्पराः । अनन्येनैवयोगेनमांध्यायन्त
उपासते ॥ ६ ॥ तेषामहंसमुद्धर्तामृत्युसंसारसागरात् । भवामिनचिरात्पार्थमय्यावेशि
तचेतसाम् ॥ ७ ॥ मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय । निवसिष्यसिमय्येवअतऊ
र्ध्वंनसंशयः ॥ ८ ॥ अथचित्तंसमाधातुन्नशक्नोषिमयिस्थिरम् । अभ्यासयोगेनततोमा
मिच्छाप्तुन्धनञ्जय ॥ ९ ॥ अभ्यासेप्यसमर्थोऽसिमत्कर्मपरमोभव । मदर्थमपिकर्माणि
कुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥ अथैतदप्यशक्तोऽसिकर्तुंमद्योगमाश्रितः । सर्वकर्मफल

गीता त्यागन्ततःकुरुयतात्मवान् ॥ ११ ॥ श्रेयोहिज्ञानमभ्यासाज्ज्ञानाद्ध्यानम्विशिष्यते । ध्या
॥४२॥ नात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥ अद्वेष्टासर्वभूतानाम्मैत्रःकरुण एव
च । निर्ममोनिरहङ्कारःसमदुःखसुखःक्षमी ॥ १३ ॥ सन्तुष्टःसततंयोगीयतात्मादृढ
निश्चयः । मय्यर्पितमनोबुद्धिर्योमद्भक्तःसमेप्रियः ॥ १४ ॥ यस्मान्नोद्विजतेलोकोलो
कान्नोद्विजतेचयः । हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रियः ॥ १५ ॥ अनपेक्षःशुचिर्दक्ष
उदासीनोगतव्यथः । सर्वारम्भपरित्यागीयोमद्भक्तःसमेप्रियः ॥ १६ ॥ योनहृष्यतिन
द्वेष्टिनशोचतिनकांक्षति । शुभाशुभपरित्यागीभक्तिमान्यःसमेप्रियः ॥ १७ ॥ समःश

त्रौचमित्रेचतथामानापमानयोः । शीतोष्णसुखदुःखेषुसमःसङ्गविवर्जितः ॥ १८ ॥
तुल्यनिन्दास्तुतिर्मौनीसन्तुष्टोयेनकेनचित् । अनिकेतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः
॥ १९ ॥ येतुधर्म्यामृतमिदंयथोक्तम्पर्युपासते । श्रद्दधानामत्परमाभक्तास्तेऽतीवमेप्रियाः
॥ २० ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेभ
क्तियोगोनामद्वादशोऽध्यायः ॥ १२ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ श्रीभगवानुवाच ॥
इदंशरीरङ्कौन्तेयक्षेत्रमित्यभिधीयते । एतद्योवेत्तितम्प्राहुःक्षेत्रज्ञमितितद्विदः ॥ १ ॥
क्षेत्रज्ञञ्चापिमाम्विद्धिसर्वक्षेत्रेषुभारत । क्षेत्रक्षेत्रज्ञयोर्ज्ञानंयत्तज्ज्ञानम्मतम्मम ॥ २ ॥

तत्क्षेत्रंयच्चयादृक्चयद्विकारियतश्चयत्। सचयोयत्प्रभावश्चतत्समासेनमेशृणु ॥ ३ ॥ ऋ
षिभिर्बहुधागीतंछन्दोभिर्विविधैःपृथक् । ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः
॥ ४ ॥ महाभूतान्यहङ्कारोबुद्धिरव्यक्तमेवच। इन्द्रियाणिदशैकञ्चपञ्चचेन्द्रियगोचराः
॥ ५ ॥ इच्छाद्वेषःसुखन्दुःखंसङ्घातश्चेतनाधृतिः। एतत्क्षेत्रंसमासेनसविकारमुदाहृत
म् ॥ ६ ॥ अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम्। आचार्योपासनंशौचंस्थैर्यमा
त्मविनिग्रहः ॥ ७ ॥ इन्द्रियार्थेषुवैराग्यमनहङ्कारएवच । जन्ममृत्युजराव्याधिदुःख
दोषानुदर्शनम् ॥ ८ ॥ असक्तिरनभिष्वङ्गःपुत्रदारगृहादिषु। नित्यञ्चसमचित्तत्वमि

ष्टानिष्टोपपत्तिषु ॥ ९ ॥ मयिचानन्ययोगेनभक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमर
तिर्जनसंसदि ॥ १० ॥ अध्यात्मज्ञाननित्यत्वन्तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमितिप्रो
क्तमज्ञानंयदतोऽन्यथा ॥ ११ ॥ ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते । अनादिमत्पर
म्ब्रह्मनसत्तन्नासदुच्यते ॥ १२ ॥ सर्वतःपाणिपादन्तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतः
श्रुतिमल्लोकेसर्वमावृत्यतिष्ठति ॥ १३ ॥ सर्वेन्द्रियगुणाभासंसर्वेन्द्रियविवर्जितम् । अ
सक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच ॥ १४ ॥ बहिरन्तश्चभूतानामचरञ्चरमेवच । सूक्ष्म
त्वात्तदविज्ञेयंदूरस्थञ्चान्तिकेचतत् ॥ १५ ॥ अविभक्तञ्चभूतेषुविभक्तमिवचस्थितम् ।

गीता भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच ॥ १६ ॥ ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यते
॥४४॥ । ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधिष्ठितम् ॥ १७ ॥ इतिक्षेत्रन्तथाज्ञानंज्ञेयञ्चोक्तंसमा
सतः । मद्भक्तएतद्विज्ञायमद्भावायोपपद्यते ॥ १८ ॥ प्रकृतिम्पुरुषञ्चैवविद्ध्यनादीउ
भावपि । विकारांश्चगुणांश्चैवविद्धिप्रकृतिसम्भवान् ॥ १९ ॥ कार्यकारणकर्तृत्वेहेतुःप्र
कृतिरुच्यते । पुरुषःसुखदुःखानाम्भोक्तृत्वेहेतुरुच्यते ॥ २० ॥ पुरुषःप्रकृतिस्थोहिभु
ङ्क्तेप्रकृतिजान्गुणान् । कारणंगुणसङ्गोऽस्यसदसद्योनिजन्मसु ॥ २१ ॥ उपद्रष्टानुम
न्ताचभर्त्ताभोक्तामहेश्वरः । परमात्मेतिचाप्युक्तोदेहेऽस्मिन्पुरुषःपरः ॥ २२ ॥ यएवम्वे

त्तिपुरुषम्प्रकृतिञ्चगुणैस्सह । सर्वथावर्त्तमानोऽपिनसभूयोऽभिजायते ॥ २३ ॥ ध्याने
नात्मनिपश्यन्तिकेचिदात्मानमात्मना । अन्येसांख्येनयोगेनकर्मयोगेनचापरे ॥ २४ ॥
अन्येत्वेवमजानन्तःश्रुत्वान्येभ्यउपासते । तेऽपिचातितरन्त्येवमृत्युंश्रुतिपरायणाः ॥ २५ ॥
यावत्सञ्जायतेकिञ्चित्सत्त्वंस्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धिभरतर्षभ ॥ २६ ॥
समंसर्वेषुभूतेषुतिष्ठन्तम्परमेश्वरम् । विनश्यत्स्वविनश्यन्तंयःपश्यतिसपश्यति
॥ २७ ॥ समम्पश्यन्हिसर्वत्रसमवस्थितमीश्वरम् । नहिनस्त्यात्मनात्मानन्ततोया
तिपराङ्गतिम् ॥ २८ ॥ प्रकृत्यैवतुकर्म्माणिक्रियमाणानिसर्वशः । यःपश्यतितथात्मा

 नमकर्त्तारंसपश्यति ॥ २९ ॥ यदाभूतपृथग्भावमेकस्थमनुपश्यति । ततएवचविस्ता
 रम्ब्रह्मसम्पद्यतेतदा ॥ ३० ॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः । शरीरस्थो
ऽपिकौन्तेयनकरोतिनलिप्यते ॥ ३१ ॥ यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यते । स
र्वत्रावस्थितोदेहेतथात्मानोपलिप्यते ॥ ३२ ॥ यथाप्रकाशयत्येकःकृत्स्नंलोकमिमंर
विः । क्षेत्रंक्षेत्रीतथाकृत्स्नम्प्रकाशयतिभारत ॥ ३३ ॥ क्षेत्रक्षेत्रज्ञयोरेवमन्तरंज्ञान
चक्षुषा । भूतप्रकृतिमोक्षञ्चयेविदुर्यान्तितेपरम् ॥ ३४ ॥ इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेक्षेत्रक्षेत्रज्ञविभागयोगोनामत्रयोदशोऽ

ध्यायः ॥ १३ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ श्रीभगवानुवाच ॥ परम्भूयःप्रवक्ष्यामिज्ञा
नानांज्ञानमुत्तमम् । यज्ज्ञात्वामुनयस्सर्वेपरांसिद्धिमितोगताः ॥ १ ॥ इदंज्ञानमुपा
श्रित्यममसाधर्म्यमागताः । सर्गेऽपिनोपजायन्तेप्रलयेनव्यथन्तिच ॥ २ ॥ ममयो
निर्महद्ब्रह्मतस्मिन्गर्भन्दधाम्यहम् । सम्भवःसर्वभूतानान्ततोभवतिभारत ॥ ३ ॥ सर्वयोनि
षुकौन्तेयमूर्त्तयःसम्भवन्तियाः । तासांब्रह्ममहद्योनिरहम्बीजप्रदःपिता ॥ ४ ॥ सत्वं
रजस्तमइतिगुणाःप्रकृतिसम्भवाः । निबध्नन्तिमहाबाहोदेहेदेहिनमव्ययम् ॥ ५ ॥
तत्रसत्त्वंनिर्मलत्वात्प्रकाशकमनामयम् । सुखसङ्गेनबध्नातिज्ञानसङ्गेनचानघ ॥ ६ ॥

गीता रजोरागात्मकम्विद्धितृष्णासङ्गसमुद्भवम्। तन्निबध्नातिकौन्तेयकर्मसङ्गेनदेहिनम्॥ ७॥
॥४६॥ तमस्त्वज्ञानजम्विद्धिमोहनंसर्वदेहिनाम्। प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारत॥ ८॥
सत्त्वंसुखेसञ्जयतिरजःकर्मणिभारत। ज्ञानमावृत्यतुतमःप्रमादेसञ्जयत्युत॥ ९॥
रजस्तमश्चाभिभूयसत्त्वम्भवतिभारत। रजस्सत्वन्तमश्चैवतमःसत्वंरजस्तथा॥ १०॥
सर्वद्वारेषुदेहेऽस्मिन्प्रकाशउपजायते। ज्ञानंयदातदाविद्याद्विवृद्धंसत्त्वमित्युत॥ ११॥
लोभःप्रवृत्तिरारम्भःकर्मणामशमस्पृहा। रजस्येतानिजायन्तेविवृद्धेभरतर्षभ॥ १२॥
अप्रकाशोऽप्रवृत्तिश्चप्रमादोमोहएवच। तमस्येतानिजायन्तेविवृद्धेकुरुनन्दन॥ १३॥

यदासत्त्वेप्रवृद्धेतुप्रलयंयातिदेहभृत् । तदोत्तमविदांलोकानमलान्प्रतिपद्यते
॥ १४ ॥ रजसिप्रलयङ्गत्वाकर्मसङ्गिषुजायते । तथाप्रलीनस्तमसिमूढयोनिषुजायते
॥ १५ ॥ कर्मणःसुकृतस्याहुःसात्त्विकंनिर्मलंफलम् । रजसस्तुफलन्दुःखमज्ञानन्तम
सःफलम् ॥ १६ ॥ सत्त्वात्सञ्जायतेज्ञानंरजसोलोभएवच । प्रमादमोहौतमसोभवतोऽ
ज्ञानमेवच ॥ १७ ॥ ऊर्ध्वंगच्छन्तिसत्त्वस्थामध्येतिष्ठन्तिराजसाः । जघन्यगुणवृत्ति
स्थाअधोगच्छन्तितामसाः ॥ १८ ॥ नान्यंगुणेभ्यःकर्त्तारंयदाद्रष्टानुपश्यति । गुणेभ्य
श्चपरंवेत्तिमद्भावंसोऽधिगच्छति ॥ १९ ॥ गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवान् । ज

न्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ अर्जुनउवाच ॥ कैर्लिङ्गैस्त्रीन्गुणानेतानती
तोभवतिप्रभो । किमाचारःकथञ्चैतांस्त्रीन्गुणानतिवर्त्तते ॥ २१ ॥ श्रीभगवानुवाच ॥
प्रकाशञ्चप्रवृत्तिञ्चमोहमेवचपाण्डव । नद्वेष्टिसम्प्रवृत्तानिननिवृत्तानिकाङ्क्षति ॥ २२ ॥
उदासीनवदासीनोगुणैर्योनविचाल्यते । गुणावर्त्तन्तइत्येवयोवतिष्ठतिनेङ्गते ॥ २३ ॥
समदुःखसुखःस्वस्थःसमलोष्ठाश्मकाञ्चनः । तुल्यप्रियाप्रियोधीरस्तुल्यनिन्दात्मसंस्तुतिः
॥ २४ ॥ मानापमानयोस्तुल्यस्तुल्योमित्रारिपक्षयोः । सर्वारम्भपरित्यागीगुणातीतःस
उच्यते ॥ २५ ॥ माञ्चयोव्यभिचारेणभक्तियोगेनसेवते । सगुणान्समतीत्यैतान्ब्रह्मभूयाय

कल्पते ॥ २६ ॥ ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच । शाश्वतस्यचधर्मस्यसुखस्यै
कान्तिकस्यच ॥ २७ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसम्वादेगुणत्रयविभागयोगोनामचतुर्दशोऽध्यायः ॥ १४ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥
श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशाखमश्वत्थम्प्राहुरव्ययम् । छन्दांसियस्यपर्णानिय
स्तम्वेदसवेदवित् ॥ १ ॥ अधश्चोर्ध्वम्प्रसृतास्तस्यशाखागुणप्रवृद्धाविषयप्रवालाः । अ
धश्चमूलान्यनुसन्ततानिकर्मानुबन्धीनिमनुष्यलोके ॥ २ ॥ नरूपमस्येहतथोपलभ्यतेना
न्तोनचादिर्नचसम्प्रतिष्ठा । अश्वत्थमेनंसुविरूढमूलमसङ्गशस्त्रेणदृढेनछित्त्वा ॥ ३ ॥

ततःपदन्तत्परिमार्गितव्यंयस्मिन्गतानन निवर्त्तन्तिभूयः। तमेवचाद्यम्पुरुषम्प्रपद्येयतःप्र
वृत्तिःप्रसृतापुराणी ॥ ४ ॥ निर्मानमोहाजितसङ्गदोषाअध्यात्मनित्याविनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताःसुखदुःखसंज्ञैर्गच्छन्त्यमूढाःपदमव्ययन्तत् ॥ ५ ॥ नतद्भासयतेसूर्य्यो न
शशाङ्कोनपावकः। यद्गत्वाननिवर्त्तन्तेतद्धामपरमम्मम ॥ ६ ॥ ममैवांशोजीवलोकेजी
वभूतःसनातनः। मनःषष्ठानीन्द्रियाणिप्रकृतिस्थानिकर्षति ॥ ७ ॥ शरीरंयदवाप्नोति
यच्चाप्युत्क्रामतीश्वरः। गृहीत्वैतानिसंयातिवायुर्गन्धानिवाशयात् ॥ ८ ॥ श्रोत्रञ्चक्षुःस्प
र्शनञ्चरसनंघ्राणमेवच। अधिष्ठायमनश्चायंविषयानुपसेवते ॥ ९ ॥ उत्क्रामन्तंस्थि

तम्वापिभुञ्जानम्वागुणान्वितम् । विमूढानानुपश्यन्तिपश्यन्तिज्ञानचक्षुषः ॥ १० ॥ य
तन्तोयोगिनश्चैनम्पश्यन्त्यात्मन्यवस्थितम् । यतन्तोप्यकृतात्मानोनैनम्पश्यन्त्यचेतसः
॥ ११ ॥ यदादित्यगतन्तेजोजगद्भासयतेऽखिलम् । यच्चन्द्रमसियच्चाग्नौतत्तेजोविद्धि
मामकम् ॥ १२ ॥ गामाविश्यचभूतानिधारयाम्यहमोजसा । पुष्णामिचौषधीस्सर्वास्सो
मोभूत्वारसात्मकः ॥ १३ ॥ अहम्वैश्वानरोभूत्वाप्राणिनान्देहमाश्रितः । प्राणापानसमा
युक्तःपचाम्यन्नञ्चतुर्विधम् ॥ १४ ॥ सर्वस्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानमपोह
नञ्च । वेदैश्चसर्वैरहमेववेद्योवेदान्तकृद्वेदविदेवचाहम् ॥ १५ ॥ द्वाविमौपुरुषौ

लोकेक्षरश्चाक्षरएव च। क्षरःसर्वाणिभूतानिकूटस्थोऽक्षरउच्यते ॥ १६ ॥ उत्तमःपु
रुषस्त्वन्यःपरमात्मेत्युदाहृतः। योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः ॥ १७ ॥ यस्मा
त्क्षरमतीतोऽहमक्षरादपिचोत्तमः। अतोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ॥ १८ ॥
योमामेवमसम्मूढोजानातिपुरुषोत्तमम्। ससर्वविद्भजतिमांसर्वभावेनभारत ॥ १९ ॥
इतिगुह्यतमंशास्त्रमिदमुक्तम्मयानघ। एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत ॥ २० ॥
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेपुरुषोत्तम
प्राप्तियोगोनामपञ्चदशोऽध्यायः ॥ १५ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ श्रीभगवानुवाच ॥

अभयंसत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानन्दमश्चयज्ञश्चस्वाध्यायस्तपआर्जवम् ॥ १॥
अहिंसासत्यमक्रोधस्त्यागश्शान्तिरपैशुनम् । दयाभूतेष्वलोलुत्वम्मार्द्दवंह्रीरचापल
म् ॥ २ ॥ तेजःक्षमाधृतिश्शौचमद्रोहोनातिमानिता । भवन्तिसम्पदन्दैवीमभिजात
स्यभारत ॥ ३ ॥ दम्भोदर्पोऽभिमानश्चक्रोधःपारुष्यमेवच । अज्ञानञ्चाभिजातस्यपार्थ
सम्पदमासुरीम् ॥ ४ ॥ दैवीसम्पद्विमोक्षायनिबन्धायासुरीमता । माशुचस्सम्पद
न्दैवीमभिजातोऽसिपाण्डव ॥ ५॥ द्वौभूतसर्गौलोकेऽस्मिन्दैवआसुरएवच । दैवोविस्तर
शःप्रोक्तआसुरम्पार्थमेशृणु ॥ ६ ॥ प्रवृत्तिञ्चनिवृत्तिञ्चजनानविदुरासुराः । नशौचन्ना

गीता पिचाचारोनसत्यन्तेषुविद्यते ॥ ७ ॥ असत्यमप्रतिष्ठन्तेजगदाहुरनीश्वरम् । अपर
॥५०॥ स्परसम्भूतङ्किमन्यत्कामहैतुकम् ॥ ८ ॥ एतांदृष्टिमवष्टभ्यनष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणःक्षयायजगतोऽहिताः ॥ ९ ॥ काममाश्रित्यदुःपूरन्दम्भमानमदान्विताः
। मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तन्तेऽशुचिव्रताः ॥ १० ॥ चिन्तामपरिमेयाञ्चप्रलयान्तामु
पाश्रिताः । कामोपभोगपरमाएतावदितिनिश्चिताः ॥ ११ ॥ आशापाशशतैर्बद्धाःकाम
क्रोधपरायणाः । ईहन्तेकामभोगार्थमन्यायेनार्थसञ्चयान् ॥ १२ ॥ इदमद्यमयालब्धमि
दम्प्राप्स्येमनोरथम् । इदमस्तीदमपिमेभविष्यत्तिपुनर्द्धनम् ॥ १३ ॥ असौमयाहतः

शत्रुर्हनिष्येचापरानपि। ईश्वरोहमहम्भोगीसिद्धोहम्बलवान्सुखी॥ १४॥ आढ्योऽ
भिजनवानस्मिकोऽन्योऽस्तिसदृशोमया। यक्ष्येदास्यामिमोदिष्यइत्यज्ञानविमोहिताः
॥ १५ ॥ अनेकचित्तविभ्रान्तामोहजालसमावृताः। प्रसक्ताःकामभोगेषुपतन्तिनरकेऽ
शुचौ ॥ १६ ॥ आत्मसम्भाविताःस्तब्धाधनमानमदान्विताः। यजन्तेनामयज्ञैस्तेदम्भे
नाविधिपूर्वकम् ॥ १७ ॥ अहङ्कारम्बलन्दर्पङ्कामंक्रोधञ्चसंश्रिताः। मामात्मपरदेहे
षुप्रद्विषन्तोभ्यसूयकाः ॥ १८ ॥ तानहन्द्विषतःक्रूरान्संसारेषुनराधमान्। क्षिपाम्य
जस्रमशुभानासुरीष्वेवयोनिषु ॥ १९ ॥ आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि।

 मामप्राप्यैवकौन्तेयततोयान्त्यधमांगतिम् ॥ २० ॥ त्रिविधन्नरकस्येदंद्वारन्नाशनमात्म
 नः । कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयन्त्यजेत् ॥ २१ ॥ एतैर्विमुक्तःकौन्तेयतमोद्वा
रैस्त्रिभिर्नरः । आचरत्यात्मनश्श्रेयस्ततोयातिपराङ्गतिम् ॥ २२ ॥ यश्शास्त्रविधिमु
त्सृज्यवर्त्ततेकामकारतः । नससिद्धिमवाप्नोतिनसुखन्नपराङ्गतिम् ॥ २३ ॥ तस्माच्छा
स्त्रम्प्रमाणन्तेकार्याकार्यव्यवस्थितौ । ज्ञात्वाशास्त्रविधानोक्तङ्कर्मकर्तुमिहार्हसि ॥ २४ ॥
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेदैवासुरसम्प
द्विभागयोगोनामषोडशोऽध्यायः ॥ १६ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अर्जुनउवाच ॥

येशास्त्रविधिमुत्सृज्ययजन्तेश्रद्धयान्विताः । तेषान्निष्ठातुकाकृष्णसत्त्वमाहोरजस्तमः
॥ १ ॥ श्रीभगवानुवाच ॥ त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा । सात्त्विकीराजसी
चैवतामसीचेतितांशृणु ॥ २ ॥ सत्त्वानुरूपासर्वस्यश्रद्धाभवतिभारत । श्रद्धामयोयम्पु
रुषोयोयच्छ्रद्धस्सएवसः ॥ ३ ॥ यजन्तेसात्त्विकादेवान्यक्षरक्षांसिराजसाः । प्रेतान्भूत
गणांश्चान्येयजन्तेतामसाजनाः ॥ ४ ॥ अशास्त्रविहितंघोरन्तप्यन्तेयेतपोजनाः । दम्भा
हङ्कारसंयुक्ताःकामरागबलान्विताः ॥ ५ ॥ कर्षयन्तश्शरीरस्थम्भूतग्राममचेतसः । मा
ञ्चैवान्तश्शरीरस्थन्तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥ आहारस्त्वपिसर्वस्यत्रिविधोभवति

गीता प्रियः । यज्ञस्तपस्तथादानन्तेषाम्भेदमिमंशृणु ॥ ७ ॥ आयुस्सत्त्वबलारोग्यसुखप्रीति
॥५२॥ विवर्द्धनाः । रस्याःस्निग्धाःस्थिराहृद्याआहारास्सात्त्विकप्रियाः ॥ ८ ॥ कट्वम्ललवणात्यु
ष्णतीक्ष्णरूक्षविदाहिनः । आहाराराजसस्येष्टादुःखशोकामयप्रदाः ॥ ९ ॥ यातयाम
ङ्गतरसम्पूतिपर्युषितञ्चयत् । उच्छिष्टमपिचामेध्यम्भोजनन्तामसप्रियम् ॥ १० ॥ अ
फलाकाङ्क्षिभिर्यज्ञोविधिदृष्टोयइज्यते । यष्टव्यमेवेतिमनःसमाधायससात्त्विकः ॥ ११ ॥
अभिसन्धायतुफलन्दम्भार्थमपिचैवयत् । इज्यतेभरतश्रेष्ठतंयज्ञम्विद्धिराजसम् ॥ १२ ॥
विधिहीनमसृष्टान्नम्मन्त्रहीनमदक्षिणाम् । श्रद्धाविरहितंयज्ञन्तामसम्परिचक्षते ॥ १३ ॥

देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवम्। ब्रह्मचर्यमहिंसाचशारीरन्तपउच्यते॥ १४॥
अनुद्वेगकरम्वाक्यंसत्यम्प्रियहितञ्चयत्। स्वाध्यायाभ्यसनञ्चैववाङ्मयन्तपउच्यते
॥ १५॥ मनःप्रसादःसौम्यत्वंमौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत्तपोमानसमुच्य
ते॥ १६॥ श्रद्धयापरयातप्तन्तपस्तत्त्रिविधन्नरैः। अफलाकाङ्क्षिभिर्युक्तैःसात्त्विकम्परि
चक्षते॥ १७॥ सत्कारमानपूजार्थन्तपोदम्भेनचैवयत्। क्रियतेतदिहप्रोक्तंराजसं
चलमध्रुवम्॥ १८॥ मूढग्राहेणात्मनोयत्पीडयाक्रियतेतपः। परस्योत्सादनार्थंवा
तत्तामसमुदाहृतम्॥ १९॥ दातव्यमितियद्दानन्दीयतेऽनुपकारिणे। देशेकालेचपात्रे

चतद्दानंसात्त्विकंस्मृतम् ॥ २० ॥ यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः । दीयतेचपरि
क्लिष्टन्तद्दानंराजसंस्मृतम् ॥ २१ ॥ अदेशकालेयद्दानमपात्रेभ्यश्चदीयते । असत्कृ
तमवज्ञातन्तत्तामसमुदाहृतम् ॥ २२ ॥ ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः । ब्रा
ह्मणास्तेनवेदाश्चयज्ञाश्चविहिताःपुरा ॥ २३ ॥ तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः
। प्रवर्त्तन्तेविधानोक्ताःसततम्ब्रह्मवादिनाम् ॥ २४ ॥ तदित्यनभिसन्धायफलंयज्ञतपः
क्रियाः । दानक्रियाश्चविविधाःक्रियन्तेमोक्षकाङ्क्षिभिः ॥ २५ ॥ सद्भावेसाधुभावेचसदि
त्येतत्प्रयुज्यते । प्रशस्तेकर्मणितथासच्छब्दःपार्थयुज्यते ॥ २६ ॥ यज्ञेतपसिदानेचस्थि

तिःसदितिचोच्यते। कर्मचैवतदर्थीयंसदित्येवाभिधीयते ॥ २७ ॥ अश्रद्धयाहुत
न्दत्तन्तपस्तप्तंकृतञ्चयत्। असदित्युच्यतेपार्थनचतत्प्रेत्यनोइह ॥ २८ ॥ इतिश्रीभ
गवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेश्रद्धात्रयविभागयोगो
नामसप्तदशोऽध्यायः ॥ १७ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ अर्जुनउवाच ॥ संन्यास
स्यमहाबाहोतत्त्वमिच्छामिवेदितुम्। त्यागस्यचहृषीकेशपृथक्केशिनिषूदन ॥ १ ॥ श्री
भगवानुवाच ॥ काम्यानांकर्मणांन्यासंसंन्यासङ्कवयोविदुः। सर्वकर्मफलत्यागम्प्राहुस्त्या
गंविचक्षणाः ॥ २ ॥ त्याज्यन्दोषवदित्येकेकर्मप्राहुर्मनीषिणः। यज्ञदानतपःकर्मन

गीता त्याज्यमितिचापरे ॥ ३ ॥ निश्चयंशृणुमेतत्रत्यागेभरतसत्तम । त्यागोहिपुरुषव्याघ्रत्रि
॥५४॥ विधस्सम्प्रकीर्त्तितः ॥ ४ ॥ यज्ञदानतपःकर्मनत्याज्यङ्कार्यमेवतत् । यज्ञोदानन्तपश्चै
वपावनानिमनीषिणाम् ॥ ५ ॥ एतान्यपितुकर्माणिसङ्गन्त्यक्त्वाफलानिच । कर्त्तव्यानी
तिमेपार्थनिश्चितम्मतमुत्तमम् ॥ ६ ॥ नियतस्यतुसंन्यासःकर्मणोनोपपद्यते । मोहात्त
स्यपरित्यागस्तामसःपरिकीर्त्तितः ॥ ७ ॥ दुःखमित्येवयत्कर्मकायक्लेशभयात्त्यजेत् । स
कृत्वाराजसन्त्यागन्नैवत्यागफलंलभेत् ॥ ८ ॥ कार्यमित्येवयत्कर्मनियतंक्रियतेऽर्जुन । स
ङ्गन्त्यक्त्वाफलञ्चैवसत्त्यागस्सात्त्विकोमतः ॥ ९ ॥ नद्वेष्ट्यकुशलङ्कर्मकुशलेनानुषज्जते ।

त्यागीसत्त्वसमाविष्टोमेधावीछिन्नसंशयः ॥ १० ॥ नहिदेहभृताशक्यन्त्यक्तुङ्कर्माण्यशेष
तः । यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते ॥ ११ ॥ अनिष्टमिष्टम्मिश्रञ्चत्रिविध
ङ्कर्मणःफलम् । भवत्यत्यागिनाम्प्रेत्यनतुसन्यासिनांक्वचित् ॥ १२ ॥ पञ्चैतानिमहाबा
होकारणानिनिबोधमे । सांख्येकृतान्तेप्रोक्तानिसिद्धयेसर्वकर्मणाम् ॥ १३ ॥ अधिष्ठा
नन्तथाकर्ताकरणञ्चपृथग्विधम् । विविधाश्चपृथक्चेष्टादैवञ्चैवात्रपञ्चमम् ॥ १४ ॥ श
रीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः । न्याय्यम्वाविपरीतम्वापञ्चैतेतस्यहेतवः ॥ १५ ॥
तत्रैवंसतिकर्तारमात्मानङ्केवलन्तुयः । पश्यत्यकृतबुद्धित्वान्नसपश्यतिदुर्मतिः ॥ १६ ॥

गीता यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते। हत्वापिसइमांल्लोकान्नहन्तिननिबध्यते॥ १७॥
॥५५॥ ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचोदना। करणङ्कर्मकर्त्तेतित्रिविधःकर्मसंग्रहः॥ १८॥
ज्ञानङ्कर्मचकर्त्ताचत्रिधैवगुणभेदतः। प्रोच्यतेगुणसंख्यानेयथावच्छृणुतान्यपि॥ १९॥
सर्वभूतेषुयेनैकम्भावमव्ययमीक्षते। अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्विकम्॥ २०॥ पृ
थक्त्वेनतुयज्ज्ञानंनानाभावान्पृथग्विधान्। वेत्तिसर्वेषुभूतेषुतज्ज्ञानंविद्धिराजसम्॥ २१॥
यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहैतुकम्। अतत्त्वार्थवदल्पंचतत्तामसमुदाहृतम्॥ २२॥
नियतंसंगरहितमरागद्वेषतःकृतम्। अफलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते॥ २३॥

यत्तुकामेप्सुनाकर्मसाहङ्कारेणवापुनः । क्रियतेबहुलायासन्तद्राजसमुदाहृतम्
॥ २४ ॥ अनुबन्धङ्क्षयंहिंसामनवेक्ष्यचपौरुषम् । मोहादारभ्यतेकर्मतत्तामससमुदाहृत
म् ॥ २५ ॥ मुक्तसङ्गोऽनहंवादीधृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारःकर्तासा
त्त्विकउच्यते ॥ २६ ॥ रागीकर्मफलप्रेप्सुर्लुब्धोहिंसात्मकोऽशुचिः । हर्षशोकान्वितःकर्ता
राजसःपरिकीर्त्तितः ॥ २७ ॥ अयुक्तःप्राकृतस्तब्धःशठोनैष्कृतिकोऽलसः । विषादीदी
र्घसूत्रीचकर्त्तातामसउच्यते ॥ २८ ॥ बुद्धेर्भेदन्धृतेश्चैवगुणतस्त्रिविधंशृणु । प्रोच्य
मानमशेषेणपृथक्त्वेनधनञ्जय ॥ २९ ॥ प्रवृत्तिञ्चनिवृत्तिञ्चकार्याकार्येभयाभये । ब

गीता न्धम्मोक्षञ्चयावेत्तिबुद्धिःसापार्थसात्त्विकी ॥ ३० ॥ ययाधर्ममधर्मञ्चकार्यञ्चाकार्यमेवच ।
॥५६॥ अयथावत्प्रजानातिबुद्धिःसापार्थराजसी ॥ ३१ ॥ अधर्मन्धर्ममितियामन्यतेतमसावृता
। सर्व्वार्थान्विपरीतांश्चबुद्धिःसापार्थतामसी ॥ ३२ ॥ धृत्यायययाधारयतेमनःप्राणेन्द्रि
यक्रियाः । योगेनाव्यभिचारिण्याधृतिःसापार्थसात्त्विकी ॥ ३३ ॥ ययातुधर्मकामार्थान्धृत्या
धारयतेऽर्जुन । प्रसङ्गेनफलाकाङ्क्षीधृतिःसापार्थराजसी ॥ ३४ ॥ ययास्वप्नम्भयंशोकम्वि
षादम्मदमेवच । नविमुञ्चन्तिदुर्मेधाधृतिःसापार्थतामसी ॥ ३५ ॥ सुखन्त्विदानींत्रि
विधंशृणुमेभरतर्षभ । अभ्यासाद्रमतेयत्रदुःखान्तञ्चनिगच्छति ॥ ३६ ॥ यत्तदग्रेविष

मिवपरिणामेऽमृतोपमम्। तत्सुखंसात्त्विकम्प्रोक्तमात्मबुद्धिप्रसादजम्॥ ३७ ॥ विषयेन्द्रि
यसंयोगाद्यत्तदग्रेऽमृतोपमम्। परिणामेविषमिवतत्सुखंराजसंस्मृतम्॥ ३८॥ यदग्रेचा
नुबन्धेचसुखम्मोहनमात्मनः। निद्रालस्यप्रमादोत्थन्तत्तामसमुदाहृतम्॥ ३९॥ नत
दस्तिपृथिव्याम्वादिविदेवेषुवापुनः। सत्त्वम्प्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः॥ ४०॥
ब्राह्मणक्षत्रियविशांशूद्राणाञ्चपरन्तप। कर्माणिप्रविभक्तानिस्वभावप्रभवैर्गुणैः॥ ४१॥
शमोदमस्तपःशौचङ्क्षान्तिरार्जवमेवच। ज्ञानम्विज्ञानमास्तिक्यम्ब्रह्मकर्मस्वभावजम्
॥ ४२॥ शौर्यन्तेजोधृतिर्दाक्ष्यंयुद्धेचाप्यपलायनम्। दानमीश्वरभावश्चक्षात्त्रङ्कर्मस्वभा

भावजम् ॥ ४३ ॥ कृषिगोरक्ष्यवाणिज्यम्वैश्यकर्मस्वभावजम् । परिचर्य्यात्मकङ्कर्मशूद्र
स्यापिस्वभावजम् ॥ ४४ ॥ स्वेस्वेकर्म्मण्यभिरतःसंसिद्धिंलभतेनरः । स्वकर्मनिरतः
सिद्धिंयथाविन्दतितच्छृणु ॥ ४५ ॥ यतःप्रवृत्तिर्भूतानांयेनसर्वमिदन्ततम् । स्वकर्मणात
मभ्यर्च्यसिद्धिंविन्दतिमानवः ॥ ४६ ॥ श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् । स्व
भावनियतङ्कर्मकुर्वन्नाप्नोतिकिल्बिषम् ॥ ४७ ॥ सहजङ्कर्मकौन्तेयसदोषमपिनत्यजेत्
। सर्वारम्भाहिदोषेणधूमेनाग्निरिवावृताः ॥ ४८ ॥ असक्तबुद्धिःसर्वत्रजितात्माविगत
स्पृहः । नैष्कर्म्यसिद्धिम्परमांसंन्यासेनाधिगच्छति ॥ ४९ ॥ सिद्धिम्प्राप्तोयथाब्रह्मत

थाप्नोतिनिबोधमे । समासेनैवकौन्तेयनिष्ठाज्ञानस्ययापरा ॥ ५० ॥ बुद्ध्याविशुद्धयायु
क्तोधृत्यात्मानन्नियम्यच । शब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युदस्यच ॥ ५१ ॥ विविक्त
सेवीलघ्वाशीयतवाक्कायमानसः । ध्यानयोगपरोनित्यंवैराग्यंसमुपाश्रितः ॥ ५२ ॥ अ
हङ्कारम्बलन्दर्पंकामंक्रोधम्परिग्रहम् । विमुच्यनिर्ममःशान्तोब्रह्मभूयायकल्पते ॥ ५३ ॥
ब्रह्मभूतःप्रसन्नात्मानशोचतिनकाङ्क्षति । समःसर्वेषुभूतेषुमद्भक्तिंलभतेपराम् ॥ ५४ ॥
भक्त्यामामभिजानातियावान्यश्चास्मितत्त्वतः । ततोमान्तत्त्वतोज्ञात्वाविशतेतदनन्तरम्
॥ ५५ ॥ सर्वकर्माण्यपिसदाकुर्वाणोमद्व्यपाश्रयः । मत्प्रसादादवाप्नोतिशाश्वतम्पद

गीता मव्ययम् ॥ ५६ ॥ चेतसासर्वकर्माणिमयिसंन्यस्यमत्परः । बुद्धियोगमुपाश्रित्यमच्चि
॥५८॥ त्तस्सततम्भव ॥ ५७ ॥ मच्चित्तस्सर्वदुर्गाणिमत्प्रसादात्तरिष्यसि । अथचेत्त्वमहङ्कारा
न्नश्रोष्यसिविनंक्ष्यसि ॥ ५८ ॥ यदहङ्कारमाश्रित्यनयोत्स्यइतिमन्यसे । मिथ्यैषव्य
वसायस्तेप्रकृतिस्त्वान्नियोक्ष्यति ॥ ५९ ॥ स्वभावजेनकौन्तेयनिबद्धःस्वेनकर्मणा । क
र्तुन्नेच्छसियन्मोहात्करिष्यस्यवशोपितत् ॥ ६० ॥ ईश्वरस्सर्वभूतानांहृद्देशेऽर्जुनतिष्ठति
। भ्रामयन्सर्वभूतानियन्त्रारूढानिमायया ॥ ६१ ॥ तमेवशरणङ्गच्छसर्वभावेनभारत
। तत्प्रसादात्परांशान्तिंस्थानम्प्राप्स्यसिशाश्वतम् ॥ ६२ ॥ इतितेज्ञानमाख्यातङ्गुह्याद्गुह्य

तरंमया। विमृश्यैतदशेषेणयथेच्छसितथाकुरु ॥ ६३ ॥ सर्वगुह्यतमम्भूयःशृणुमेपरमम्व
चः। इष्टोऽसिमेदृढमितिततोवक्ष्यामितेहितम् ॥ ६४ ॥ मन्मनाभवमद्भक्तोमद्याजीमान्न
मस्कुरु। मामेवैष्यसिसत्यन्तेप्रतिजानेप्रियोऽसिमे ॥ ६५ ॥ सर्वधर्मान्परित्यज्यमामेकंशर
णम्व्रज। अहन्त्वांसर्वपापेभ्योमोक्षयिष्यामिमाशुचः ॥ ६६ ॥ इदन्तेनातपस्कायनाभक्ता
यकदाचन। नचाशुश्रूषवेवाच्यन्नचमांयोऽभ्यसूयति ॥ ६७ ॥ यइदम्परमंगुह्यम्मद्भक्ते
ष्वभिधास्यति। भक्तिम्मयिपरांकृत्वामामेवैष्यत्यसंशयः ॥ ६८ ॥ नचतस्मान्मनुष्येषुकश्चि
न्मेप्रियकृत्तमः। भवितानचमेतस्मादन्यःप्रियतरोभुवि ॥ ६९ ॥ अध्येष्यतेचयइमन्धर्म्यं

 सम्वादमावयोः। ज्ञानयज्ञेनतेनाहमिष्टःस्यामितिमेमतिः॥ ७०॥ श्रद्धावाननसूयश्च
 शृणुयादपियोनरः। सोऽपिमुक्तःशुभांल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्॥ ७१॥ कच्चिदेतच्छ्रुत
म्पार्थत्वयैकाग्रेणचेतसा। कच्चिदज्ञानसम्मोहःप्रणष्टस्तेधनञ्जय॥ ७२॥ अर्जुनउवाच॥
नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत। स्थितोऽस्मिगतसन्देहःकरिष्येवचनन्तव
॥ ७३॥ सञ्जयउवाच॥ इत्यहम्वासुदेवस्यपार्थस्यचमहात्मनः। सम्वादमिममश्रौषमद्भु
तंरोमहर्षणम्॥ ७४॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहम्परम्। योगंयोगेश्वरात्कृष्णात्सा
क्षात्कथयतःस्वयम्॥ ७५॥ राजन्संस्मृत्यसंस्मृत्यसम्वादमिममद्भुतम्। केशवार्जुनयोःपु

ण्यंहृष्यामिचमुहुर्मुहुः ॥ ७६ ॥ तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः। विस्मयोमेमहान्रा
जन्हृष्यामिचपुनःपुनः ॥ ७७ ॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्द्धरः। तत्रश्रीर्विजयो
भूतिर्ध्रुवानीतिर्मतिर्मम ॥ ७८ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्री
कृष्णार्जुनसम्वादेमोक्षसंन्यासयोगोनामाष्टादशोऽध्यायः ॥ १८ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥
अब्देपञ्चाङ्गनागावनिभिरभियुते १८६५ व्योमरामाद्रिचन्द्रे शाके १७३० माघेऽसिताख्ये
ऽवनिसुतनवमीसत्तिथौमुद्रिकाख्यैः। गीतांविद्वद्भिरुद्धांद्विजकुलतिलकैर्लेखितांविष्णुभ
क्ताबाबूरामैस्स्वगृह्णन्त्वथसकलमनोऽभीष्टदोविष्णुरस्तु ॥ १ ॥ ऽऽऽऽऽऽऽऽऽऽऽऽऽऽ ॥

| पत्रे | पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|
| १ | २ | ४ | शोऽथहस्र | शोऽथसहस्र |
| १ | २ | ७ | मष्टादसा | मष्टादशा |
| १७ | २ | ५ | साधिना | समाधिना |
| २५ | १ | ६ | भगवतगीता | भगवद्गीता |
| ४२ | २ | ७ | शमः | समः |

164 91

THE LIBRARY OF CONGRESS

HECKMAN
BINDERY INC.
APR 91
N. MANCHESTER,
INDIANA 46962

LC FT. MEADE
0 019 089 844 1